ः॥ श्रीगणेशायनमः॥ ॥श्रीनृसिंहंनमस्कृत्यरमेशंभक्तवत्सलं॥शुल्बस्यविवृतिं
वक्ष्मिभाष्यवृत्यनुसारिणी॥श्रीमान्कात्यायनःपंचदशानुगारवामाधारणकंसूत्रं
विरचयतत्रकथितंवेद्यामानोपयोगितयाशुल्बपरिशिष्टंचीकीर्षुप्रतिज्ञानीते॥
रज्जुसमासंवक्ष्यामः॥रज्वासमस्यतेसंक्षिप्यतेयःप्रदेशःसरज्जुसमासंसमासो
व्यासस्यापुपलक्षकः।चतुरस्राच्चतुरस्रंनिर्ज्ञिद्दीर्घंनित्यादिवक्ष्यमाणत्वात्
रज्वासंक्षिप्यतेविस्तार्यतेवयायतेप्रकारंकथयिष्यामइत्यर्थः॥यद्वारज्जोः
समासंसम्यगसनंक्षेत्रानुगुण्यं।तथाधारयंरज्जुसमासंतंवक्ष्यामः॥प्रति
ज्ञेषाशिष्यप्रोत्साहनाय॥श्रोतापप्रवर्त्ततेसुकरंज्ञातसंबंधंश्रोतुंज्ञातार्थं॥
प्राग्वंशादौप्राक्शब्दःश्रूयते॥तथाहश्रोचमुद्धरंतीत्यादावतोप्राचीज्ञानार्थं

माह॥समेशंकुनिखायशंकुसंमितयारज्वामंडलंपरिलिख्ययत्ररेखयोः।शं
कुग्रेछायानिपततितत्रशंकुनिहंतिसाप्राची॥समेन्यूनपूरणाधिकखननाभ्यां
समीकृतेप्रदेशेशंकुद्वादशांगुलंसूक्ष्माग्रंपृथुमूलंनिखायस्थापयित्वाशंकु
संमितयाद्वादशांगुलयामद्वादशकोसंमितयारज्ज्वाभिन्नप्रक्षेयेदित्यस्यक्रो
तस्यप्रयोगः॥रज्वामंडलंकृतंपरिलिख्यकृत्वारेखयोमंडलपूर्वापररेखयोर्य
त्रस्थलेशंकुग्रेछायानिपततिपश्चिमरेखायांसदिशतिपूर्वरेखायांनिःसरति
तत्रस्थलभ्रमेदौअन्योशंकुनिहंतिनिरवनेश्चिक्रमंवाकुर्यात्तत्रप्राक्शं
कुःप्राची॥पश्चिमशंकुंप्रतीची।प्राचीसूचीधीना॥तस्माद्भ्रमस्थानानावकृत्वा
त्रुटिर्नभिन्नत्वादनियमेनप्राचीज्ञातुंनशक्यातस्माच्छंकुस्थापनेनप्राचीसा

धनमुकंदक्षिणायनेचित्रापर्यंतमुत्तरायणे स्वातिपर्यंतमर्कोभ्युदेतिमेषतु
लां तुसंक्रांत्यहेप्राच्यांशुद्धायामुदेतिततोर्कात्प्राचीज्ञानंदुर्घटं॥अथोदीची
साधनमाह॥तदंतरंरज्वाभ्यस्तपाशैंकृत्वाशंकोःपाशैंकृत्वाप्रतिमुच्यदक्षि
णायम्यमध्यमेशंकुंनिहत्यैवमुत्तरतःसोदीची॥तदंतरंयोःप्राचीसूत्रांतस्थि
तशंकोरंतरंमध्यरज्वाभ्यस्तरज्वाकृतात्द्विगुणीकृत्यतदंतरज्ञभ्भा
गस्यद्विगुणीकर्तुमशक्यत्वात्प्राचीसूत्रमितभुजेरज्वामीतांरज्जुंद्विगुणयि
त्वाद्विगुणीकृतरज्वोरंतरयोःपाशैंकृत्वारज्जोर्मानेयथान्यूनंहीयतेतथापाशैंकृत्वा २
कृत्वाप्राचीसूत्रांतस्थितशंकोःतोपाशैंप्रतिमुच्यप्रक्षिप्यद्विगुणीकृतरज्जो
र्मध्यभागंचिन्हंदक्षिणस्यांदिशिन्यायम्यांकृत्वायत्ररज्जुमध्यमाप्तितत्रमध्य

मेमध्यचिन्हस्थलेशंकुंनिहंतिनिरवनतिसादक्षिणादिक्करणंवमुत्तरतोद्विगुणि
तरज्जुमुत्तरस्यामाकृष्यमध्यभागेशंकुंनिहंतिसाउदीचीउत्तरादिगित्यर्थः॥अ
न्यथामानार्थयारज्जोरंतयोःपाशकरणनियममाह॥रज्वंतयोःपाशैंक
रोति॥परिभाषासूत्रं॥यामानार्थंगृहीतारज्जुस्तदंतयोःपाशैंकुर्यात्यद्यपि
पाशैंकृत्वेत्युक्तंतथापितिर्यङ्मानार्थादिरज्जुमात्रेप्राप्तेपुनर्वचनंअन्यथा
मानार्थंरज्जौचिह्नस्थानान्याह॥श्रोणयश्चनिरंछनसंज्ञासमा रव्या
सभंगेषुलक्षणानि॥तिर्यङ्मानेनकृतेवायकोणेश्रोणिरुद्वाचेत्॥ईशानाग्
निकोणवंसरुद्वाभिधेयोनिरंछनमभ्यासचतुर्थभागः॥प्रमाणमस्यासमा
सदतुर्थलक्षणंकरोतितंनिरंछनमितिवक्ष्यमाणत्वात्क्षेत्रामामितेकार॰

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

ज्जुदंडरज्जुसंज्ञा सा ताचतीक्षितीयाभ्यासरज्जुः। तयोर्यासंरम्भाक्षित्वलक्षणा
॥तस्यांसमासएककृत्यरणं॥ तदर्धभंगोभंजनसंरम्भासमासभंगः॥श्रो
णीचअंसोचनिरछनेस्वसंरम्भासमासभंगश्चेतेषुलक्षणानिचिन्हानिक
रोतित्यनुषंगः॥श्रोणयादिपदेनश्रोणयादिपरिछेदकरज्जवोगृह्यंते॥तत्र
चिन्हानिकुर्यात्॥प्राचंतयोरंकुंनिहंति॥ प्राचीसूत्रंप्रतियोरंकुद्वयंच
निरवनेतत्समेरंकुंनिरवयेत्यादिनायद्यपिरंकुंनिरवननमुक्तंतथापितत्रा
चीसाधनंपुनरुक्तंजत्रसुनरन्यत्रापीएकेत्रेप्राचीपरिछेदायरंकुद्वयंनिर
खननंमुच्यतइतिनदोषः। कोणेषुरंकुनिरवननमाह॥श्रोण्यारंभयोश्च
दक्षिणोत्तरयोः श्रोण्यरंभयोरपिचतुरःरंकून्निहंतिवक्ष्यमाणविधिनार

ज्जुवितानेयत्रज्वेतस्तत्रकोणेषुरंकवोनिरवेयामानानेतरंक्षेत्रपरिछेदाये
तितात्पर्यार्थः॥ श्रोण्यंससाधनमाह॥रंकोः पार्श्वेप्रतिमुच्यनिरछनेनगृहीत्वा
दक्षिणापूर्वादिशंहरंति॥प्राचीसूत्रप्रतियोर्वर्तमानयोःरंकोःपार्श्वेछिद्रमुलि
तरज्वंतकृतपार्श्वेप्रतिमुच्यनिरंछनेनाभ्यासचतुर्थांशकृतलक्षणेनवक्ष्यमा
णेनगृहीत्वातंरज्जुमादायदक्षिणापूर्वांदक्षिणस्याःपूर्वस्याअंतरालभूताम
ग्नेयीदिशंप्रतिहरंतिआकर्षंतिकुशलाः॥ततोःसचिह्नेःपूर्वोक्तःरंकुरेकोटे
यएवमुत्तरः॥एवंरंकोःपार्श्वावरोप्यनिरंछनेनरज्जुमादायउत्तरतःउत्तरपूर्वो
त्तरांदिशंहरंतितत्रोत्तरांसचिन्हेपरःरंकुर्देयः॥विज्ञालक्षेत्रएकेनरज्जुप्र
सारणस्यकर्तुमशक्यत्वाद्धरंतीतिनऋुवचनं॥विपर्यस्येतरतःइतरतःपश्चिम

भागे विपर्यस्य रज्जुपार्श्वोपरि वर्त्मपूर्वं शंकुपार्श्वं पश्चिमशंकौ कृत्वापश्चात्पूर्व
शंकौ कृत्वा निरंछनेन रज्जुनैर्ऋतीप्रत्याकृष्य दक्षिणश्रोणौ शंकुं देयः एवमुत्त
रतोवायवीदिशं प्रत्याकृष्योत्तरश्रोणौ शंकुं देयः। शंकवस्तुकाएव प्रमेतयो
रित्यादिसूत्रद्वयेन॥ समसमाधिः सर्वत्र॥ सउक्तः रज्जुतयोः पार्श्वोकरोतित्यादि
सूत्रोक्तसमाधिः समाधानंक्षेत्रमानविधिसर्वत्रसमचतुरस्रेषुदीर्घचतुर
स्रेष्वपिज्ञेयः॥ निरंछनस्वरूपमाह॥ प्रमाणमभ्यस्याभ्यासचतुर्थलक्षणं
करोतितन्निरंछनं॥ प्रमाणइष्टक्षेत्रायामेअभ्यस्यद्विगुणीकृत्वाऽभ्यासच ४
तुर्थोऽभ्यस्तरज्वोश्चतुर्थैःश्रोसंख्यासमासभंगसमीपलक्षणंकरोतिनत्वंते॥
मिति॰ तस्यलक्षणस्यनिरंछनसंज्ञा॥ निरस्यतेआकृष्यतेऽनेनतिनिरंछनं॥क्षेत्रा

यामरज्जुर्दंडरज्जुः। द्विगुणीकृताभ्यासरज्जुः। तत्रदंडरज्जुसमीपवर्त्तिनीअभ्यास र
ज्जुश्चतुर्थश्रोचिक्कुर्यादित्यर्थः॥ निरंछनेनाकर्षणेकृतेतिर्यग्गतंक्षेत्रंयत्रवर्तते
भागपंचकंकर्णरज्जुर्नवतितयोःसंज्ञाद्वयमाह॥ अक्षणयातिर्यङ्मानीश्रेषःति
र्यङ्मान्याश्रेषातिर्यङ्मानिश्रेषः तिर्यङ्मान्याश्रेषश्चूतायारज्जुःसाक्ष्णयास
ज्ञानिरंछनेनाकर्षणेकृतेश्रोणेसपरिछेदिकायारज्जुसातिर्यङ्मानीसाहिप्रा
चीसूत्रावलंबमातिर्यङ्मानीभवति॥ तच्छेषभूतायारज्जुःकर्णसूत्रंभूतासाक्ष्ण
या॥ अयमर्थः॥ प्राचीसूत्रायामश्रोणेसमानातिरिक्तरज्जुश्रेषः॥ साअक्ष्ण
या तिर्यङ्मानीच॥ तांविनाश्रोणेसपरिछेदाभावात्॥ निरंछनस्यलक्षणांतरमा
ह॥ प्रमाणार्द्धंवाभ्यस्याभ्यासषष्ठेनाक्षणंकरोतितन्निरंछनं॥ दीर्घचतुरस्रमहा

वेदीपत्नीशालासदआदौनिरंछनप्रकारोयं॥ प्रमाणार्हंसमंचतुरस्रंप्राच्यस्यदिगुणंकृ
त्वाद्विगुणितरज्जोःषष्ठांशेनसंरंध्रोसमासभंगनिकृत्तिनिलक्षणंकरोत्वित
न्निरंछनं॥तदेवासपरिछेदकं॥तदर्धंश्रोणेःपरिछेदः॥एतच्चांसस्यत्रिंशात्मकम
पक्षेश्रोण्योस्तुत्रयस्त्रिंशात्मकमपक्षेबोध्यं॥प्रक्रमलक्षणमाह॥आधानेतुपदंकु
र्यात्सोमेतुद्विपदीभवेत्॥अग्नौतुत्रिपदंकार्यमितत्प्रक्रमलक्षणं॥१॥अंसंश्रोत्रिं स॰
ल० शात्मकमपक्षःपरशारवीयः॥श्रुतिकल्पसूत्राभ्यामनुक्तंत्॥महावेद्यांषट्त्रिंशा
त्मकमाः॥तदर्धमक्षदशाप्रक्रमान्संवर्ध्यवर्धितषष्ठांशेनलक्षणं॥शालायांविंशति ५
रत्नयः॥तदर्धदशारत्नीनभ्यस्यषष्ठांशेचिन्हंएवंसदस्यक्षदशारत्नयः॥तद
र्धंनवारत्नयोभ्यस्यएवमन्येष्वपिदीर्घचतुरस्रेष्वयमेवविधिः॥अक्षायातिर्यङ्मा

शंकुः॥समचतुस्रस्य

नीशेषः॥अत्रापितिर्यङ्मानन्यायेनैकोरज्जुभागोऽक्षायासंज्ञइतिपूर्ववद्व्याख्येयं॥
र चतुस्रस्यश्रोणेरंसस्यानमाह॥प्रमाणार्हंसमचतुरस्रस्यतुल्यायामविस्तारस्यक्षेत्रस्य
प्रमाणार्हंआयामार्हंशंकुर्देयः॥सचाभ्यासरज्जोरर्हंदेयःश्रोण्यंसपरिछेदायनिरं
छनांत्यस्यासरज्जोश्चतुर्थांशोऽन्तकः॥दीर्घचतुरस्रस्यश्रोणेरंसमानमाह॥शास्त्रकृद्
र्हंदीर्घचतुरस्रस्यदीर्घचतुरस्रस्यतुल्यशास्त्रवदर्धंशंकुर्देयः॥श्रोण्यंसपरिछेदाय॥शा
स्त्रेणोक्तंमानंतिर्यङ्मानंतत्तुल्यशास्त्रवत्॥तस्यार्धंमध्येशंकुः॥महावेद्यांचतुर्वि
ंशतिपुरस्तादित्युक्तं॥नवतिर्मीतिसदसितदर्धादशासुमहावेद्यांसार्धचतुष्टये
चसदसिशंकुर्देयः॥एवमन्यत्रापिशाकटमुखस्यचैवंनादौ॥शाकटमुखस्यचम
नादौशाकटमुखाकृतेस्त्रिक्षेत्रस्यशास्त्रोक्तविस्तारार्धंश्रोण्यंशंकुर्देयइत्य

र्थः॥एतेप्राग्वंशावेदिमानानिर्माख्यातानि॥एतेनसमचतुरस्रदीर्घचतुरस्र
ज्जुमानकथनेनप्राग्वंशस्यहविर्धानादेःवेरश्चैष्टिकसौमिकादेर्मानानिर्मा
ख्यातानि॥समचतुरस्रप्राग्वंशोभवति॥वेदिस्तुचतुर्मुखा॥शुल्वमानंच॥शुल्
वमानमप्येतेनैवमाख्यातं॥शुल्वमादौदीर्घचतुरस्रायातिधानात्॥विंशतिकृ
त्यामादत्तेकरविमस्तृतायतः॥शुल्वंप्राङ्मुदगायतातुशुल्वमासन्नेषुक्तामे
वात्रसूत्रकारोब्रवीति॥सैवसौमेप्रागायतायाग्न्यासिरुवत्॥तत्रादौचीप्राची
वत्प्रसाधनीयाउत्तरमतत्वात्तत्रशुल्वमाः आदावुदीच्यारज्ज्वासंकृत्वाशंकु
निहत्यपश्चातिर्यङ्मानंसाध्यमितिभावः॥सदसश्चैवं॥सदसोपिशुल्वमानं
कार्यंसदोपिदीर्घचतुरस्रंयतः॥अत्राप्यादावुदीचीप्राचीवत्साध्या॥परिभाष्यमा

तत्रशुल्वायांउदीचीप्राचीवत्

ह॥अपरिमितप्रमाणाऽन्यः॥मत्रंयत्राःपरिमितशब्दःश्रूयतेतत्रतत्रप्रमाणा
ऽनुक्तमानाऽन्याःधिकंमानेत्याद्यं॥अपरिमितोवेतिमध्येष्टिवेदावुक्तंअपरिमि
मत्र तेष्टकइतिमन्त्रंयनेषुक्तं॥एतद्वयंविनोक्तमानाधिकत्वंवापरिमितशब्दः।इ
ष्टिवेद्योश्चमनेचमानाभावार्थेःपरिमितशब्दइतिबोध्यं॥एवंसर्वत्रापिप्रसंगेन
व्यवस्थामाह॥प्रमाणंशास्त्रंप्रमाणंनिरूपंसंज्ञाः॥निर्हसविवृद्धोःक्षयस्य विर
वृद्धेश्चप्रमाणंपरिछेदप्रमाणंशास्त्रमेवनान्यत्॥ह्रासेवृद्धौचशास्त्रोक्तएव
ह्रासेवृद्धिर्वाग्राह्यानस्वेच्छयायथाष्टविधादिचयनेषुपुरुषमात्राभ्युच्चयनेवृद्धिः
यथाचशृंगेरत्निमितेवोच्छ्रायेसोत्राणिवेद्यांयथासौमिकीवेदिर्ह्रासंसोपिप्रक्रम
तन्त्रेणमानंकृत्वैवतत्कार्यः॥योगश्चयोगानमेमुक्तीरप्यात्रयणीयमुक्त्वाह्रा

सहधिविधेयेनाधिकन्यूने॥इतरस्यवितृतीयेदक्षिणतइत्येतद्वक्ष्यामः॥इतर
स्यवितृतीयेदक्षिणतइतियद्दक्षिणाग्निप्रकृत्यकात्यायनोक्तं॥एतद्वक्ष्यामः
विच्छ्रप्यमिस्यामः॥प्रतिज्ञातामाह॥गार्हपत्याहवनीययोरंतरंषोढासमधा
वागंतुसमंत्रेधाविभज्यापरवितृतीयलक्षणेनदक्षिणायम्यतस्मिन्नग्निः
गार्हपत्याहवनीययोरंतरंगार्हपत्याहवनीययोर्येमध्यस्थानेतयोर्मध्यभा
गक्षेत्रमितरज्जुंषोडासमधावाकृत्वाषड्भागंसमभागंवाविधायेनयाप्यपि
आगंतुसमंआगंतुनावर्द्धितनागसहितांतांमध्यरज्जुंत्रेधाविभज्यत्रिनागान्
कृत्वातत्रतृतीयेतृतीयेनागेसचिह्नंकृत्वाअपरवितृतीयलक्षणेनापर
पश्चिमेनागेतृतीयेयत्रलक्षणंचिह्नंतत्रधृत्वारज्जुप्रांतपाशौगार्हपत्याहव

नीयमध्यस्थितशंकूनिधायपरवितृतीचिह्नेनदक्षिणादक्षिणास्यादिशि
आयम्याकृष्यतस्मिन्नग्निंआकृष्यतृतीयभागचिह्नेसृष्टेभागेग्निर्दक्षि
णाग्नेर्मध्यरज्जुरित्यर्थः॥पक्षद्वयेषोडाविभागपक्षउत्तरोयतस्तत्रैपार्श्व
मानैमङ्गल्योसमेस्यातांतदाकल्पसूत्रेणापिसममविरोधः॥समधाभागपक्षेतु
तयोःकल्पमंतरंस्यात्॥उत्करस्यानमाह॥विपर्यस्योत्तरतउत्करः॥विपर्यस्यपा
शौविपर्यस्यवीपरितौकृत्वाषोडासमधावाविभागेतुभागसहितवर्द्धिश्रोणा
मग्निः॥अपिचापक्षेदक्षिणाग्निकार्यः॥अंतरत्रिभागेनयोरज्वाअंतरे
गार्हपत्याहवनीयोर्मध्येयारज्जुःसात्रिनागेनात्रिधाविभाज्यस्तृतीय
भागेनोनाकार्या॥तयारज्जुकरणापूर्वदिक्त्राहवनीयमध्यात्पश्चिम

समचतुरश्रंदैर्घ्यात्श्रोण्यामग्निः॥

मागं

भागेसमचतुरस्रमुक्तविधिनाकार्यंतस्यप्राग्याद्दक्षिणाप्राग्यामग्निर्दक्षि
णाग्नेर्मध्यमित्यर्थः॥कार्यइतिशेषः॥विपर्यस्यान्तरंसउत्करः॥विपर्यस्यवै
परिलेनचतुरस्रंकृत्वापश्चिमाद्वेगार्हपत्यमध्यात्पूर्वभागेतृतीयभागान्या
वन्निदूयांतरालमितरज्वाचतुरस्रंकृत्वातस्मिंश्चतुरस्रस्यान्तरंसउत्करः
कार्मः॥ ॥इतिश्रीमल्वेविवरणेमहीधरविरचितेप्राच्यादिकथनंनामप्रथ
माकंडिकागमत्॥॥रथमात्रेतिवरुणप्रघासेरथमात्रवेदिःश्रूयतेत
न्निरूपणायाह॥अंगुलेरथसंमितायाःप्रमाणं॥रथसंमितामावेदेःप्रमाणं
अंगुलैःकृत्वावक्ष्यामीतिशेषः॥रथकारश्रंस्त्रंगुलैरेवरथमानस्यकृ
त्वात्॥तत्राष्टाग्नीतिन्नातमीषा॥इषाश्वेनरथगतंदूर्वापरापतंकाष्ठमु

त्तेः॥तदष्टाग्नीत्यधिकमंगुलशतमितंभवति॥चतुरंगुलन्यूनाष्टहस्तप्रमि
त्यर्थः॥तेनवेदेःपूर्वापरायामतावानिभावः॥चतुरश्रंक्षः॥रथस्यपर
श्चाद्भागेतिर्यगायतंकाष्ठमक्षशब्देनोच्यतेतत्॥चतुःशतंचतुरधिकमं
गुलशतमितं॥अष्टांगुलाधिकहस्तचतुष्टयमित्यर्थः॥तेनवेदेःश्रोणि
मानंतिर्यक्कूटायामश्चतुरधिकशतांगुलमितइतिभावः॥षडग्नीमुगं॥दृ
षत्स्कंध्योपरिदीयमानेकाष्ठेयुगं॥तत्षडग्नीतिरंगुलानि॥दृशांगुलोना
श्चत्वारोहस्ताः॥तेनवेदेःप्राक्तिर्यगायामःषडग्नीत्यंगुलइतिभावः॥चत्वा
रोऽष्टकाश्चम्याः॥चत्वारोऽष्टकाद्वात्रिंशदंगुलानिश्चम्यामानं॥युगछिद्रवे
शाहंकाष्ठेश्चम्याः॥साष्टांगुलाधिकहस्तमिताश्चम्याचात्वात्मानंलक्ष्यति

दिक्त्रा क्षिपुरुषमात्रे मिमीतेइति पितृमेधे श्रूयतेतस्यायमर्थः॥ दिक्षुसूत्रक्र
यः॥ कोणमस्यतत्॥ दिक्सक्थि दिक्कोणं चतुरस्त्रमित्यर्थः॥ अस्मिन्प्रयोगेतु वि
दिक्कोणस्यचतुरस्त्रप्रकारउक्तःतानीदिक्कोणंचतुरस्रंवक्तुमाह॥ पैतृकांक्षिपु
रुषंसमचतुरस्रंकृत्वाकरणीमध्येषुशंकवःसमाधिः॥ पैतृकांपितृमेधेदि
पुरुषंपुरुषद्वयक्षेत्रफलकंसमचतुरस्रंकृत्वाकरणीनांचतसृणांरज्जूनांम
ध्येषुमध्यन्यासेषुशंकवश्चत्वारः॥ सउक्तःसमाधिस्समाधानंप्रयोक्तविदिक्कोणच
तुरस्त्रस्य॥ समचतुरस्त्रस्याक्ष्णयारज्जुर्दिक्करणीतिवक्ष्यमाणप्रकारेणपुरुष ९
मात्रसमचतुरस्रकोणसूत्रमानेनसमचतुरस्रेकृतेपुरुषक्षेत्रंतेसमचतुरस्त्र लू
मवति॥ तस्यकरण्यश्चतस्रः॥ पार्श्वैरज्जुद्वयंदक्षिणेत्तरदिग्वर्त्तमानांतिर्यग्र

ऊर्द्धमंसूत्रंपरदिग्वर्त्तमानं॥ एवंरज्जुचतुष्टयमध्येचतुरश्रंकृत्वातेषुचत्वारि
सूत्राणिपातयेत्एवंविदिग्यातकोणंसमचतुरस्रंभवतीत्यर्थः॥ ग्रंथेव्यवहारार्थंपं
चरज्जुसंज्ञाआह॥ करणीतत्करणीतिर्यङ्मानीपार्श्वमान्यक्ष्णयेतिएतेरज्जवः॥
करणीतत्करणीतिर्यङ्मानी पार्श्वमानी अक्ष्णया॥ एताःपंचरज्जूनांसंज्ञाः
तत्रक्रियतेक्षेत्रपरिच्छेदनमेतिकरणीप्राचीसूत्रंतामध्यरज्जुः॥ तत्क्षेत्रदै
गुण्यादिक्रियतेःनयासातत्करणीद्विकरणीत्रिकरणीचतुःकरण्यादिः॥२॥
तिर्यक्क्षेत्राण्येवंसमरूपंमीयतेःनयासातिर्यङ्मानी॥ प्राचीसूत्रंतयास्तिर्यग्व
र्त्तमानंरज्वोर्द्वयं॥३॥ पार्श्वमीयतेःनयासापार्श्वयोर्वर्त्तमानंपूर्वापरयतंरज्वोर्द्वयं
॥४॥ अक्षिवत्क्षेत्रंनयतीत्यक्ष्णया॥ कोणसूत्रंभूतामध्यरज्जुः॥ तस्मादन्तरा

चतुरस्रमक्षिद्धमसदृशं भवति॥ततोक्ष्णयेतिकोणसूत्ररज्जुः यद्यपेतासंज्ञाग्रंथादौ
वक्तव्यास्तथापीनस्तासांबाहुत्वेनोपयोगाद्वत्रेवोक्ता॥यत्रतत्रस्थितोन्यायःसर्व
त्रोपयोगीतिज्ञापयितुमितिन्यायः॥दशपदोन्नरवेदिर्भवतिइतिसोमेश्रुश्रूयतेत
त्साधनार्थमाह॥षट्पदंतिर्यङ्मानीत्रिपदापार्श्वमानीतस्याक्ष्णयारज्जुर्दशाकरणी॥
तस्यैतिपदस्यतृतीयस्यैतिषष्ठस्याध्याहारःयस्यक्षेत्रस्यतिर्यङ्मानीदक्षिणोन्न
तमंतंसूत्रपदंप्रमाणंभवतिद्वादशांगुलपदंयस्यचपार्श्वमानीतिर्यङ्मान्याएकत
रांतात्प्रसारितंप्राग्यावत्परामर्शंसूत्रंत्रिपदात्रिपदपरिमितंसमंदक्षस्यामतंभवति॥ १०
तस्यक्षेत्रस्याक्ष्णयारज्जुःकोणसूत्रंकृतातिर्यङ्मानस्यपरांतात्पार्श्वमान्यंतपर्यंतं
नीतारज्जुर्दशाकरणीभवति॥दशपदक्षेत्रस्यफलकस्यचतुरस्रस्यकरणीप्राची

सूत्रपरिमाणंभवतीत्यर्थः॥चयनेचत्वारिंशत्पदोन्नरवेदिर्भवतित्यपिश्रूयतेतदर्थं
माह॥द्विपदातिर्यङ्मानीषट्पदापार्श्वमानीतस्याक्ष्णयारज्जुश्चत्वारिंशत्करणी॥
यस्यक्षेत्रस्यतिर्यङ्मानीदक्षिणोन्नतसूत्रंद्विपदापदकृतिमितापार्श्वमानीप्रागायत
तंसूत्रंषट्पदाषट्कृतिता।तस्यक्षेत्रस्याक्ष्णयारज्जुःकोणसूत्रंचत्वारिंशत्करणी
चत्वारिंशत्पदक्षेत्रस्यफलकस्यचतुरस्रस्यसाधिकाभवतीत्यर्थः॥युगमात्रीवे
तिचयनेसोमेचयुगमात्रोन्नरवेदिः॥श्रूयते॥शम्यामात्रीमितिवरुणप्रघासेशा॰
म्यामात्युन्नरवेदिःश्रूयते॥तत्प्रमाणंक्वयंमयानिहितमित्याह॥उपदिष्टंयुगप्रमा
णंशम्याप्रमाणंचदर्शनादुन्नरवेदिप्रमाणस्योपलब्धयेदर्शनात्युगप्र
माणंषडश्रीतियुगमित्युपदिष्टंशम्याप्रमाणंचत्वारोष्टकाःशम्यइत्युपदिष्टकथिते॥

क्षेत्रपरिछेदार्थमिदमाह॥दीर्घचतुरस्रस्याक्ष्णयारज्जुस्तिर्यङ्मानीपार्श्वमानीच
यत्पृथक्कृतेकुरुतस्तदुभयंकरोतीतिक्षेत्रज्ञानंदीर्घचतुरस्रस्यतिर्यङ्मानीपार्श्व
मानयोरज्जुपृथग्भूतेसत्योपदक्षेत्रंमतफलंक्षेत्रंसमचतुरस्रंद्वयंकुरुतःतत
उभयमपिमिलितंदीर्घचतुरस्रस्याक्ष्णयाकोणसूत्रभूतारज्जुःकरोतीतिक्षेत्र
ज्ञानंक्षेत्रमानंप्रकारोज्ञातमइत्यर्थः॥यथोक्तं॥पदंतिर्यङ्मानीत्रिपदापार्श्व
मानीतस्याक्ष्णयारज्जुर्दशकरणीतिदीर्घचतुरस्रे॥तत्रपदप्रमाणातिर्यङ्मानी
पदमात्रक्षेत्रफलंचतुरस्रंकरोति॥पार्श्वमानीतुत्रिपदामानवपदक्षेत्रफ॰ ११
लंचतुरस्रंकरोति॥एवमुभयंमिलितंदशपदक्षेत्रफलंचतुरस्रंजातं॥त
च्चदीर्घचतुरस्रपदमत्रतिर्यङ्मानीत्रिपदपार्श्वमानीभ्यांकृतस्याक्ष्णयारज्जु

न्यो

रेवकरोतीतिज्ञेयंतिर्यङ्मोपार्श्वमान्याश्चवर्गीकृत्वातावेकीकृतस्यमूलंस
य मानंविदीचतुरस्रस्यकर्णसूत्रमानमेवभवतीयतः समहिगुणानंवर्गः
मूलानयनंतुत्यक्त्वात्यद्विषमाकृतिमितिजीवतीश्लोकेबोध्यं॥एवम
न्यत्रापिक्षेत्रज्ञानप्रकारः॥एवंक्षेत्रज्ञानप्रकारंसंक्षेपतोभिधायइदानीमिष्ट
कारमाह॥समचतुरस्रस्याक्ष्णयारज्जुर्हिकरणी॥समचतुरस्रक्षेत्रस्याऽ
क्ष्णयारज्जुःकरणसूत्रंचतुस्त्रिंशद्गुणानिकिंचिन्न्यूनानितान्येवहिहस्त
चतुरस्रस्यप्रमाणं॥यावत्प्रमाणारज्जुर्नवति॥तावंतस्तावंतितान्समस्यैहि
तिवक्ष्यमाणत्वात्॥यथाहस्तमात्रेसमचतुरस्रेचतुर्विंशत्यंगुलप्रमाणरज्जु
स्तत्रश्चतुर्विंशतिश्चतुर्विंशत्यागुणितायट्सप्तत्यधिकापंचशताभवति॥सा

द्विगुणितत्रीपंचाशदधिकैकादशशतीस्यात्॥तस्यामूलंकिंचिन्न्यूनंचतुस्त्रिंश
दंगुलानि॥तान्येवद्विहस्तसमचतुरस्रायामप्रमाणं॥एवमग्रेपित्रिहस्तादौएकहस्त
वर्गंत्रिगुणादिकृत्वातत्तन्मूलानयनेनतत्तदायामप्रमाणंबोध्यं॥द्विकरणीसाध
नेप्रकारांतरमाह॥॥करणीतृतीयेनवर्गितेतच्चस्वचतुर्थेनात्मश्चतुस्त्रिंशेनेन
सविशेषंगाकरणीमेकहस्तक्षेत्रायामंतृतीयेनवर्गितंतत्स्वतृतीयांशेनवर्गितं
तत्स्वचतुर्थेनवर्द्धयेत्तदितिसामान्येननपुंसकनिर्देशः॥तंतृतीयांचतुर्थेनतृ
तीयांशस्यचश्चतुर्थांभागस्तेनवर्द्धयेत्॥किंभूतेनस्वचतुर्थेनआत्मचतुस्त्रिंशो
नेनआत्मनश्चतुर्थांशस्यचश्चतु स्त्रिंशेनभागस्तइचिक्रितेन॥स्वचतुस्त्रिंशां
शहीनस्वचतुर्थभागेनतंतृतीयांशंवर्द्धयेदित्यर्थः॥यथा॥हस्तमितसमचतु



रस्रसमकरणीचतुर्विंशतिसंगुलसूत्रात्द्विगुणीक्रियतेयदातदातंतृतीयांशेन
वर्द्धयेत्॥चतुर्विंशतेस्तृतीयांशेअष्टवंगुलानि॥एवंहात्रिंशदंगुलानिजातानि॥
स्वचतुर्थेनक्रीतेनात्मचतुस्त्रिंशेनेन॥एवमंगुलद्वयस्यचतुस्त्रिंशद्भागोपू
कात्रयं॥तिक्षाषट्कं॥किंचिदूनंबालाग्रंच॥तावताहीनेनांगुलद्वयेनतृतीयांशा
गोवर्द्धितः॥एवंचसतिद्विहस्तकरणीतावतासंपन्ना॥त्रयस्त्रिंशदंगुलानिसप्त
यवाः॥चतस्रोयूकाः॥द्वेलिक्षेकिंचिन्मूनंबालाग्रेण॥चतुस्त्रिंशत्तिलाअंगुला
यवाःकिंचिदूनाभवंति॥तावतातिलद्वयोनानिचतुस्त्रिंशदंगुलानिद्विहस्तकरणी द्वि
त्यर्थः॥सविशेषाभेदकःकरणीद्विकरणेभ्यः॥इतिविशेषोद्विकरणीसाधकप्र
कारांतरमित्यर्थः॥एवंद्विकरणीमुक्त्वात्रिकरणीसाधनमाह॥प्रमाणंतिर्यग्द्वि

करणीमामस्तस्याक्षणायारज्जुस्त्रिकरणीप्रमाणंत्रिगुणीकर्तुमिष्टस्यक्षेत्रस्य
करणीरूपंतिर्यक्प्रसार्यंतिर्यक्मानीकर्तव्या॥द्विकरणीपूर्वमुक्तंद्विकरणीमा
नेएकहस्तस्याक्षणायारूपंआयामःपूर्वापरायतंपार्श्वमानीत्वेनप्रसार्यं॥एवंक्षे
त्रेत्रिकेदीर्घचतुरस्रेकृतेतस्यक्षेत्रस्यास्याक्षणायारज्जुकर्णसूत्ररूपात्रिकरणी
भवति॥हस्तमात्राणित्रीणिचतुरस्राणिसंक्षिपतिइत्यर्थः॥यथाहस्तमानातिर्य
ग्मानी॥किंचिदूनचतुस्त्रिरज्वंगुलमितापार्श्वमानीः॥तयोरग्रेप्रोतिताकर्णरे
ज्जुस्त्रिकरणीत्रिहस्तक्षेत्रस्यकरणीसाधिकातयासाधितेसमचतुरस्रेत्रिहस्ते १३
भवतीत्यर्थः॥त्रिकरणीकथनस्यप्रयोजनमाह॥तृतीयकरणेयतेनआरभ्या
ता॥एतेनत्रिकरणीकथनेनतृतीयकरणेयत्नोरभ्यमाणस्तृतीयेनाकृतेनेति

व्या

सोत्रामण्यामुक्तं॥तत्रप्रक्रमस्यतृतीयभागःप्रक्रमतृतीयोनभवति॥किंतुमा
करणीप्रक्रमक्षेत्रेतृतीयांशसमचतुरस्रकरणीसाप्रक्रमतृतीयमूनेनोन्म
तेसैवतृतीयकरणी॥वितृतीयेयत्नेतवितृतीयंवैसोमस्यसोत्रामणीतिक्रमतेत
त्रतयातृतीयकरणीप्रक्रमेणकल्पितमावेदीमीयतेसासोमवेदेस्तृतीयांशरू
पास्यात्एवंत्रिकरणीकथनेनकथंतृतीयकरणीआरभ्यतेतिस्पष्टयितुमाह॥प्र
माणविनास्तुनवधाप्रमाणस्यप्रक्रमरूपस्यविभागोविभजनंनवधाविधेयंस्या
द्भागूनंपदं॥त्रिपदःप्रक्रमःप्रमितयारज्वाक्षेत्रंचतुरस्रीकृत्यतत्रतिर्यग्मान्योपार्श्वमान्यो
श्चत्रेधाविभज्यपूर्वापरायतंदक्षिणोत्तरायतंचसूत्रद्वयंदद्यात्॥एवंनवधा
भागोभवति॥एकैकोभागःपदपदक्षेत्रफलकःस्यात्॥करणीतृतीयंनवभा

गः करणाः प्रक्रमरूपास्तृतीयं तृतीयोभागः षट्रूपः करणीभूमच्चतुरस्रंकु
र्वन्नवभागोभवतिनवमंभागंपदंसंक्षिपतीत्यर्थः॥नवभागास्त्रयः स्तृतीयक
रणी॥प्रक्रमरूपकरणीकृतस्यसमचतुरस्रस्ययेचयेनवभागाः सातृतीयकर
णी॥साचैवंकार्यापदमितयाकारणयासमचतुरस्रंकृत्वातत्करणिसूत्रंपदंक्रि
णीरूपंपार्श्वमानीकृत्वापदमितकरणीमेवतिर्यङ्मानीविधायतोभ्यांदी
र्घश्चतुरस्रंकृतेतत्करणिरज्जुःतृतीयकरणीसाचकरणीभूयसमचतुरस्रंकुर्या
त्तत्रत्रयोनवभागाःसंक्षिप्यंते॥एवंतृतीयकरणेयंनेत्याख्यातेतिप्रतिज्ञा १४
तंसप्रपंचंसूत्रत्रयेणनिरूप्यतृतीयकरणयाःप्रयोजनंसूत्राभ्यामाह॥सो
त्रामणंप्रक्रमार्थं॥सौत्रामणंसौत्रामणीमार्गेप्रक्रमार्थंप्रक्रमकथना

यत्तृतीयकरण्युक्तेतिशेषः॥सौत्रामणीतृतीयकरणीरूपंप्रक्रमेणसौम
वह्निमितासतीसोमिकावेदस्तृतीयोंशरूपास्यात्॥त्रिकरणीसमासा
र्थं॥त्रिकरणीतृतीयकरणीयंकेचिदासमासार्थं॥त्रेयाणांप्रक्रमनवभा
नया गानांसंक्षेपार्थंविनानेवभागत्रयस्यसंक्षेपसूत्रकरणत्वात्॥अतः प्रक्रम
नवभागत्रयमेवसौत्रामणंप्रक्रमइत्यर्थः॥उक्तंचतुरस्रसमासंनिगमयति
तुल्यप्रमाणानांसमचतुरस्राणांमुक्तःसमासःतुल्यप्रमाणंयेषांतानितु
ल्यप्रमाणानि॥हस्तादिरूपाणितादृशानांसमचतुरस्राणांसमासःसंक्षेपःएको
करणंमुक्तं॥दशकरणीचत्वारिंशत्करणादिकथनेनं॥अतुल्यप्रमाणाना
ंसमचतुरस्राणांसमासमाह॥नानाप्रमाणानांभिन्नप्रमाणेषुणानांसमचतु

रस्त्रगणंसमासेसंक्षेपेकार्येऽल्पीयसोऽल्पतरस्यसमचतुरस्त्रस्याष्टांगुलाकर
णावर्षीयसोवृद्धतरस्यचतुरस्रस्यद्वादशांगुलाकरणी पार्श्वमानीतिर्यङ्मानी
वाऽपछिद्यातत्रऽल्पकरणीमानेनदीर्घकरणीकोणोन्मितांचिह्नयित्वावसिद्धंच
तुरंगुलादिभागंजह्यात्।।तस्यऽल्पकरणीमानेनछिन्नस्यदीर्घक्षेत्रस्याक्ष्णया
करणिसूत्ररज्जुःकरणीन्यूनचतुरस्रंकुर्वतीउभेऽल्पीयोवृद्धतरेक्षेत्रेसमस्यंति
संक्षिपति।इतिसमासोऽतुल्यप्रमाणसमचतुरस्रसंक्षेपप्रकारः।।समा।द्वादशांग
गुलकरणीकर्मैकंचतुरस्रं।तत्राष्टांगुलकरणीकंसमसितव्यं।।तत्रद्वादशांगगु १५
लकरण्यांकोणद्वारक्ष्याष्टांगुलेषुचिन्हंकुर्यात्।।चतुरंगुलानिमल्कांचिन्हा
द्वारभ्यांजिमुखंकोणांतंकर्णसूत्रंदत्वातन्मितकरण्यायत्।।चतुरस्रांतरंक्रि

यतेनत्रऽल्पमहतोःक्षेत्रयोसमासस्यात्।।एवमन्ययोरपिऽल्पमहतोःक्षेत्रयोःसमा
सप्रकारोबोध्यः।।२१।। ।।इतिश्रीज्ञानराजदैवज्ञविरचितेमहीधरविनिर्मितेचतुरस्रादिक्षेत्रव्यव
हारेद्वितीयकंडिकागमत्।। ।।एवंऽल्पमहतोक्षेत्रयोःसमासंनिरूप्यतयोरेवसमासंनिरू
पयितुमाह।।चतुरस्रात्त्वतुरस्रंनिर्जिहीर्षन्यावन्निर्जिहीर्षन्नावऽनयतोपस्थितंसूत्रं
कृत्वानिरवयपार्श्वमानींकृत्वापार्श्वमानीसंहिमितामक्ष्णयांतत्रोपसंहरतिसमासे
ऽपछेदःस्याकरण्यांचनिऽल्पःसमः।।चतुरस्रान्महतःसमचतुरस्रात्त्वतुरस्रंऽल्पंस
मचतुरस्रंनिर्जिहीर्षन्निर्हर्तुमिच्छन्नावत्तन्निर्जिहर्षितायत्समाणंऽल्पंसमच
तुरस्रंनिर्हर्तुंभृशमिच्छतिनावत्तत्समाणंकरणीउभयतोऽपछिद्यउभयो
र्महच्चतुरस्रपार्श्वमान्योरपछिद्यश्रोणितआरभ्यांकयित्वाशंकुंनिरवयंतच्चि

न्हृत्येतौरज्जुप्रसारणार्थंनिरवयप्रक्षिप्यपार्श्वमानीं कृत्वातत्रैकुक्षमप्रसा
रितंमहच्चतुरस्रंकरणीभूतंरज्जुपार्श्वमानीत्वेनपरिकल्यपार्श्वमानीसंमितं
तामेवरज्जुंअक्षण्यांकरणसूत्रंतत्राधस्तिर्यङ्मान्यांउपसंहरतिप्रसारयतिए
कतरंकुक्षेरज्जुपार्श्वंनिक्षिप्यतंरज्जुंतिर्यङ्मान्यामधःकर्णसूत्रत्वेनप्रसा
रयतिःसममासेपतेदः॥समासेक्षेत्रहृयेकेकृतेसतिसःअपक्षेदः॥त्याज्योरज्जोः॥
तस्मांरज्जोतिर्यङ्मानीसूष्टायांत्रिकोणजातेत्रिकोणबहिर्भूतोयोमाहाचतुरस्र
तिर्यङ्मानीनागःसोपक्षेदः॥त्यक्तब्यःसाकरणी॥त्रिकोणंतःपातीतिर्यङ्मानी १६
नागःकरणी॥तमाःकरणीकृतमन्यच्चतुरस्रंक्षेत्रंस्वक्षेमहतःपृथक्कृतेशेषक्षेत्रं
भवतीत्यर्थः॥एषनिर्क्षोमः॥महतःक्षेत्राद्धस्वस्यपृथक्करणंपामः॥यथा॥पंचदिं

शतिहस्तफलकात्पंचहस्तसमचतुरस्रान्नवहस्तसमचतुरस्रंपृथक्क्रियते।तदा
पंचहस्तक्षेत्रेत्रीणिहृयाहृयहस्तत्रयंमित्वापार्श्वमान्योरंकहृयंकृत्वातत्रैकुक्षये
निरवयत्वन्मितंरज्जुंकृत्वैकतस्त्रंकोरज्जुंधृत्वाःधस्तिर्यङ्मान्यांप्रसार्यमत्रपत
तितत्रचिह्नंकुर्यात्।तत्रपंचहस्तकरणंत्रिहस्तपार्श्वमानींकंचतुर्हस्तंतिर्यङ्मा
नींत्रिकोणंस्यात्॥तिर्यङ्मान्यांत्रिकोणंबहिर्भूतोयोहस्तमितभागःसताज्यः
त्रीणिहस्तचतुष्टयमितकरणीकृतंषोडशहस्तक्षेत्रफलकंसमचतुरस्रंस्यात्॥
एवंत्रिहस्तेपृथक्कृतेसतिभवति॥पंचविंशतेःसकाशान्नवानांपृथक्करणेशेषंत्रयो
विंशतिर्भवति॥पार्श्वमानीतिर्यङ्मानीवर्गहृयैक्यमूलस्यकरणीरूपत्वात्।करणीवर्ग
स्यसमचतुरस्रक्षेत्रफलरूपत्वाच्च॥इदानींदीर्घचतुरस्रस्यसमचतुरस्रीकरणं

पायमाह॥दीर्घचतुरस्रंसमचतुरस्रंचिकीर्षन्मध्येतिर्यगपछिद्यान्यतररद्धिभज्ये
तरस्तुरस्तादक्षिणतश्चोपदध्याछेषमागंतुनासंपूरयेत्तस्याक्षोनिष्क्रमः।दीर्घच
तुरस्रंविस्तारद्धिगुणायामंचतुरस्रंसमचतुरस्रंचिकीर्षन्कर्णमिछन्मध्येवि
स्तृतितुल्येनोतिर्यक्प्रसार्यपश्चिद्यद्विभज्यान्यतरतअधोगतमूर्ध्वंवासमचतु
स्रंविभज्यपूर्वापररज्वोर्भागद्वयंतुरस्रादक्षिणतश्चोपदध्यात्॥एवंभागंदीर्घ
तुरस्रलक्षणपूर्वंविभक्तसमचतुरस्रस्यतिर्यगायामंकृत्वायोजयेत॥अन्यंभा
गंतस्यदक्षिणस्यांभागायांकृत्वायोजयेत॥शेषंसमचतुरस्रंक्रियमाणन्यून
मात्रेकोणगतमष्टभागोनंभागंतुनाअधाकृतेनाष्टभागोनंपूरयेत्तत्तवैवंसमचतु
रस्रंजायतेकंजातमष्टभागस्याधाकृतत्वादतआह॥तस्याक्षोनिष्क्रमःतस्या

कृत्वातद्भागद्वयं

गंतोरंस्रास्यनिष्क्रमस्तद्भागःकार्यः॥समचतुरस्रप्रकारउक्तः॥चतुरस्राच्चतुरस्रंनिर्जिहीर्ष
न्तितिसूत्रेणवंविस्तारद्धिगुणायामस्यदीर्घचतुरस्रस्यसमत्वोपायमुक्त्वेदानींविस्ता
रद्धिगुणाधिकायामस्यदीर्घचतुरस्रस्यसमचतुरस्रत्वमाह॥अतिदीर्घचेतिर्यड्भा
न्यपछिद्यापछिद्यैकसमासेनसमस्यशेषंयथायोगमुपसंहरेदित्येकसमासः॥
अतिदीर्घविस्तारद्धिगुणाधिकायामंचेदीर्घचतुरस्रंभवतितदातिर्यड्भान्यदक्षिर
णेनसूत्र्यापछिद्यपुनःपुनर्विभज्यएकसमासेननानाप्रमाणसमासविधिनास
मस्यसंयोज्यशेषमुर्वरितमप्रियथायोगंयथायुजतेतथोक्तविधिनोपसंहरेत्।
संयोजयेत्इत्येकसमासः॥एकसमचतुरस्रीकरणंपामः॥एकसमासेन
समस्येतिवक्ष्यमाणत्वादिदंसंज्ञाकथनं॥समचतुरस्रस्यदीर्घचतुरस्रत्व

माह॥समचतुरस्रदीर्घचतुरस्रचिकीर्षन्मध्येऽक्ष्णयापछिद्यविभज्येतरत्पुर
स्ताऽन्तरतश्चोपदध्याद्विषमंचेद्यथायोगमुपसंहरेदितिमासः॥समचतुर
स्रंदीर्घचतुरस्रंचिकीर्षन्विस्तारद्विगुणायामंकर्तुमिच्छन्मध्येऽक्ष्णयावा
द्यस्रितकोणसूत्रेणापछिद्यविभज्यापछिन्नमेकांशंपुनर्विभज्यान्येकृतेकोण
दक्ष्णयाङ्कियावत्स्थानंगृहीत्वाऽतरत्एकांशंचतुर्थांशरूपंमत्स्यस्यपूर्वस्या
योजयेत्॥अन्यंपुच्छरस्यामत्स्यस्ययोजयेत्॥तथासतिदिक्कोणविस्तारद्वि
गुणायामंदीर्घचतुरस्रंस्यात्॥क्षेत्रज्ञानमात्रमेवास्यप्रयोजनं॥विषमंचतुर
स्रंचेत्तन्नवेति॥तद्यदिविस्तारद्विगुणायतदीर्घचतुरस्रंक्रियेत॥तदातत्पर
श्वोभागंउपसंहरेत्॥पूर्वोक्तानुसारेणपूर्वोक्तैकसमासयुक्तोपसंहरेत्॥समस्मे

MEMORIAL

ता॥समस्यसमचतुरस्रंकृत्वातत्रोक्तयुक्त्यादीर्घचतुरस्रंकुर्यात्॥इतिमासो
विस्तारःसमचतुरस्रस्यदीर्घचतुरस्रत्वेनप्रसारइत्यर्थः॥नियमविशेषमा
ह॥प्रमाणंचतुरस्रमादेशादन्यत्॥प्रमाणेवक्ष्यमेऽनादेशेचतुरस्रंसमच
तुरस्रमेवप्रमाणंग्राह्यधिष्ण्यादेशेतुप्रमाणविशेषकथनेतुअन्य
त्समत्रमुक्तंतत्रदेवमंडलादिकंग्राह्यंगार्हपत्यचित्यादिवत्॥क्षेत्रफ
लंवक्ष्यमुपक्रमते॥द्विप्रमाणकरणीकृतंसमचतुरस्रंचतुः॥चतुर्हस्तक्षे
त्रफलकंस्यात्॥एवंत्रिप्रमाणकरणीकृतंनवहस्तक्षेत्रफलकं॥चतुः
प्रमाणाकरणीचतुर्हस्तकरणीतत्कृतंसमचतुरस्रंषोडशहस्तफलकं
भवति॥किंनक्ष्नाक्षेत्रफलज्ञानायैवंविधेयमित्याह॥यावत्प्रमाणकर

जुर्नवति तावंतस्तावंतोवर्गा भवंति॥ तेसमस्यत्॥ यावत्प्रमाणा पंचषट्सम
हस्तादिमितारज्जुर्नवति॥ तावंतस्तावंतश्चतत्प्रमाणावर्गा नवंति तत्क्षेत्रफल
रूपाश्रयर्थः॥ समद्विराशिगुणनंवर्गः॥ यथापंचहस्तंक्षेत्रपंचानेनगुणितह
स्तक्षेत्रफलकमेवंद्विषडस्तादीनांध्यं तात्प्रमस्येत्तेषांवर्गाणांसमा
संक्रियतेनानाप्रमाणसमासविधिनापुरोक्तेनेत्यर्थः॥ न्यूनक्षेत्रस्यदि
क्षेपमाह॥ अर्धप्रमाणेनपादप्रमाणेवि धीयते॥ करणाख्यस्याऽर्धमान
ज्वासमचतुरस्रक्रियते॥ तत्रपादप्रमाणेवि धीयते॥ तत्करणीचतुर्थांश
संक्षिप्यते॥ यत्करण्याऽर्धहृतं तत्क्षेत्रफलचतुर्थांशफलकं तत्क्षेत्र
नवतीत्यर्थः॥ यथा॥ करणी२४ तद्धं१२ तत्क्षेत्र चतुरस्रंजुज्कोटिघातेन

१४४एतत्फलकंजायते॥ एतत्॥२४॥ करणीचतुरस्रफलस्य। पञ्चमांशावृत्त
तुर्थांशः॥ एवमन्यत्रापिस्वतीयेनवमोंऽशः॥ करण्यास्तृतीयांशमितर
ज्वाकृतेनसमचतुरस्रेणनवमोंऽशोगृह्यते॥ तत्करणीनवमोभागःसंक्षि
प्यते॥ ~~चतुर्थेनषोडशकलायाःकरणीचतुर्थांशमितरज्वाकृतेनसमच~~
~~तुरस्रेणषष्ठनवमोंऽशोगृह्यते॥ तत्करणीनवमोभागःसंक्षिप्यते॥~~ चतुर्थेन
षोडशीकलायत्करणीचतुर्थांशमितरज्वासमचतुरस्रंक्रियतेतेनषोड
शीकलाषोडशांशःसंक्षिप्यते॥ एषनिरासस्तस्यपुरस्ताद्भुजंशस्त्र॥ एषः
पूर्वोक्तःअर्धप्रमाणेनेत्यादिना चतुर्थनवमषोडशांशानांनिरासोमहतः
क्षेत्रात्पृथक्करणंसचकर्तुंविधेयइत्याशंक्यकार्यांतस्यनिरासस्यशस्त्रंशि

साप्रकरः॥पुरस्तात्पूर्वमुक्तं॥चतुरस्राच्चतुरस्रंनिर्जिहीर्षन्नित्यत्र॥यावत्प्रमाणरज्जुर्भवतीतिविवृद्धेरसौभवति॥अर्द्धप्रमाणेनपादप्रमाणेनेत्यादिनायः क्षेत्रस्यक्षयःसमासउक्तःसक्षयस्यक्षयमपेक्षायोयावत्प्रमा
ली णरज्जुर्भवतितावंतस्तावंतोवर्गाभवंतिसूत्रेणयाक्षेत्रफलरूपावृद्धिरुक्ता॥तस्याविवृद्धेरयंक्षयोभवति॥यथाकरणीचतुर्थांशेनचतुरस्रेहृतेकरण्याःषोडशभागःक्षयस्यसमासइत्यादि॥चतुरस्रस्यमंडलीकरणमार्गश्चतुरस्रंमंडलंचिकीर्षन्मध्यादंशेनिपात्यपार्श्वतःपरिलिख्यतत्रयदतिरिक्तंभवतितस्यतृतीयेनसहमंडलंपरिलिखेत्समाधिः॥चतुरस्रंसमं २०
चतुरस्रंमंडलंवृत्तंकर्तुमिच्छन्मध्यादंशेनिपात्यचतुरस्रमध्यभागान्॥

शेएकस्मिन्सूत्रेदत्वा॥चतुरस्रेकर्णसूत्रद्वयेदत्तेसूत्रयोःसंयोगस्थलंमध्यमितिबोध्यं॥पार्श्वतःमध्यादारभ्ययत्पार्श्वकरण्यर्द्धंतन्मानेनपरिलिख्यमध्यादारभ्यांसांतंपातितंकर्णसूत्रार्द्धंमंकथित्वातत्कर्णसूत्रार्द्धंयदतिरिक्तंअंकनादधिकोभागोभवति॥तंत्रेधाविभज्यतस्मिन्द्वितृतीयेनांशेनसहकरण्यर्द्धंसंवर्द्धतन्मानेनव्यासार्द्धेनमंडलंपरिलिखेत्कुर्यात्॥समाधिःमंडलीकरणविधिरित्यर्थः॥यद्वामध्यादंशेसूत्रंनिपात्यपार्श्वेएकत्रतेनाक्षण्यार्द्धमानेनपरिलिख्यसूत्रंदत्वातत्रसूत्रेयत्रअतिरिक्तंकरण्यर्द्धाधिकंतस्यतृतीयांशेनसहतत्संहितकरण्यर्द्धेनमंडलंकुर्यात्॥उ
या भयथापितावदेवोक्तोत्यर्थः॥तद्वृत्तंचतुरस्रतुल्यक्षेत्रफलंभवति॥य

ष्या॥ षोडशांगुलस्य चतुरस्रस्य मध्यादलं तं कर्णसूत्रमेकादशांगुलं भवति
तत्र पार्श्वमानाष्टांगुलेश्चिक्रे कृते शेषमंगुलत्रयं तत्तृतीयो भागो दशांगुलं॥ तत्र
स्मिन्नाष्टांगुलमानेनवांगुलरज्वा मध्याद्वृत्ते कृते॥ष्टादशांगुलं वृत्तं षोडशांगु
गुलचतुरस्रतुल्यक्षेत्रफलं स्यादिति॥ मंडलस्य चतुरस्रीकरणमाह॥ मंडलं
चतुरस्रं चिकीर्षन् विष्कंभं पंचदशभागान् कृत्वा द्वौ बुद्ध्वा शेषः करणी॥ वृत्त
क्षेत्रं चतुरस्रं कर्तुकामो विष्कंभं वृत्तव्यासं पंचदशभागान् कृत्वा पंचदशाद्धा
भस्त्रयो भागोऽरेत्यजेत्॥ शेषः स्त्रयोदशभागास्तत्करणी॥ तत्करणी ॥ २१
कृते समचतुरस्रवृत्ततुल्यक्षेत्रफलं स्यात्॥ इदं स्थूलमानेनोक्तं॥ सूक्ष्मंतु अ
ष्टादशभागान्कृत्वा द्वौत्यजेत्॥ तदुक्तं वार्त्तिके॥ वृत्तव्यासनवांशेवा परिरु

त्याप्यतां वदेत्॥ करणी चतुरस्रार्थमत्स्यमेवं तटं भवेत्॥ ॥ इति शौल्विविवरणेन
ढीधरविनिर्मितेसमासव्यासकथनंतृतीयकंडिकागमाप्ता॥३॥ ॥ एवं चतुरस्रा
दिक्षेत्राणि निरूप्याधिवृत्तीनिरूपयितुंतन्नामान्याह॥ क्वोणश्चिद्रथचक्रश्चिक्रं
कश्चित्प्रउगश्चिद्भमतःप्रउगसमुद्गपुराष इत्यन्वयः॥ इतिषट्अन्वयः॥ अग्निप्र
णयनाधारभूतास्त्रितयइत्यर्थः॥ एतत्पथेसूचितंअन्यत्रविवृतेताः॥ अत्रक्षेत्र
समासार्थमुक्ताः॥ क्वोणःसमचतुरस्रंतदाकारश्चितिर्द्रोणश्चित्॥१॥ रथचक्र
वृत्तंतदाकारश्चितीरथचक्रश्चित्॥२॥ कंकोबकोगगनगःतदाकारश्चितिकं
कश्चित्॥३॥ प्रउगंत्रिकोणंरथांगंतदाकारश्चितिप्रउगश्चित्॥४॥ उभयतस्त्र
दाकारश्चितिर्मध्यस्थूलाश्चितिरुभयतःप्रउगः॥५॥ समुद्गमन्यत्तथानेयंपुरी

षंस्रक्षेत्रिकात्रयसमुद्यपुरीषषडंशतिचितिः॥६॥एवमनुद्दिश्यक्रमेणतेषांक्षे
त्रसमासमाह॥त्रैकोण्यावाग्निःसपक्षपुच्छविशेषस्तावत्समंचतुरस्रंकृ
त्वात्रैकोणंदशविभागेवृत्तमित्येकेएकेआचार्याइतिवदंति॥यत्॥त्रैकोण
त्रैकोणंचितोसपक्षपुच्छविशेषः॥पक्षौचपुच्छंतदेवविशेषंतत्समंहितौया
वाग्नियादग्निक्षेत्रंसार्द्धसप्तपुरुषादि॥तावत्समंचतुरस्रंकृत्वानाना
प्रमाणसमासविधिनापक्षौपुच्छंचसमंस्यसमंचतुरस्रंकृत्वात्रैकोणस्यद
शमोभागोवृत्तं॥वृत्ताकारंस्वल्पंचतुरस्रंयोजनामितिं॥तद्योजनविधि २२
माह॥तद्वृत्तमेनापछिद्यैकसमासेनसमस्यनिर्वृत्यसर्वमग्नितथाकृति
कृत्वापुरस्तात्सम्यग्घोषदध्यात्॥ततश्चैकंसमंचतुरस्रंतस्यदशमांशेन

तिर्यगूर्ध्वंचदशधाभक्त्वाशेषीकृत्यदशांशरूपेणदशमभागेनापछिद्या
पछिद्यातिदीर्घंचादित्युक्तेनैवसमासविधिनासमंस्यएकीकृत्यतंदशमां
शंनिर्वृत्यपृथक्कृत्वाशेषंसर्वमग्नितथाकृतित्रैकोणाकारंकृत्वानिदधातंदश
मांशंपुरस्तात्सम्यग्घोषदध्याद्धृतेतेनयोजयेत्॥मंडलेप्येवं॥मंडले
वृत्तेरथचक्रचितौकंकचितावप्येवमेवं॥पूर्ववत्सक्षेपुरुषसमासेनसमंच
तुरस्रंकृत्वातद्दशमांशमपहृत्यचतुरस्रंमंडलंपूर्वोक्तविधिनाकृत्वाद्व
त्तमपिवृत्तंविधायपुरःपश्चाद्घोषोजयेत्॥इत्यर्थः॥प्रउगचितिमाह॥प्रउ
गेयावाग्निःसपक्षपुच्छविशेषस्तावद्द्विगुणंचतुरस्रंकृत्वायःपुरस्तात्करणीय
ध्येयंकुर्याच्चैकोणयोगाग्निः॥प्रउगेत्रिकोणचितौपक्षपुच्छसहितौया

वा नग्निस्वा चतुस्त्रंकृत्वा तत्सुनर्धिकरणमाद्विगुणी कृत्य धिकरणी रूपकरं
णमसमचतुरस्त्रंपुनर्विधाय पूर्ववत्तिर्यङ्मानीमध्येयःशंकुः प्रोएवोस्त्रयोहो
रंकुतत्रसूत्रत्रयेपदत्रेद्विगुणी कृतार्धयत्रिकोणंतत्तत्समप्रउगचितिः॥
उभयतःप्रउगचितिमाह॥उभयतप्रउगेतावदेवदीर्घचतुरस्त्रंकृत्वाकर
णीमध्येषुशंकवःसमाधिः॥उभयतःप्रउगेतत्रशंकचितौसपक्षपुच्छच
तुरस्त्रंकृत्वातावदेवपुरस्ताद्घर्षयित्वाद्विरद्विगुणायामंदीर्घचतुरस्त्रंविधा
यकरणीनांचतसृणांमध्यभागेषुचत्वारःशंकवोदेयाः॥तत्रसूत्रचतुष्कंद २३
त्तेउभयतस्त्रिकोणाकारचितिर्भवति॥समाधिश्चितिप्रकारः॥प्रउग
स्यचतुरस्त्रीकरणोपायमाह॥प्रउगंचतुरस्त्रंचिकीर्षन्मध्येप्राचमपछि

द्यविपर्यस्येतरतउपधायदीर्घचतुरस्त्रसमासेनसमस्यात्समाधिः॥प्रउगंत्रि
कोणंचतुरस्त्रंसमचतुरस्त्रंकर्तुमिच्छन्मध्येत्रिकोणमध्येप्राचंक्षेत्रभागमप
च्छिद्यविभज्यैकंभागंविपर्यस्यविपरीतंपश्चिममुखंत्रिकोणंकृत्वाऽपरतःद्वि
तीयभागस्यत्रिकोणमुपधायसंयोज्यवाद्यंचतुरस्त्रंजातेदीर्घचतुरस्त्रे
समासेनदीर्घचतुरस्त्रंसमचतुरस्त्रंचिकीर्षन्नित्याविधिनासमस्यात्समच दि
तुरस्त्रंकुर्यात्॥समाधिःत्रिकोणस्यसमचतुरस्त्रस्यविधिःएवमेकरणीस
मासउक्तः॥उभयतःप्रउगंचेन्मध्येतिर्यगपछिद्यपूर्ववत्समंस्यात्॥उभ
यतःत्रिकोणंचेत्समचतुरस्त्रंकर्तुमिच्छतितदामध्येस्थूलभागेतिर्यग
पछिद्यविभज्यपूर्ववत्समंस्यात्॥मध्येप्राचमपछिद्यत्यायुक्तंविधिनादी

र्घ चतुरस्रं विधाय पुनरुक्तप्रकारेण समं चतुरस्रं कुर्यात्॥ इति कर्णद्वयसमासः
॥ एतेनैव त्रिकर्णसमासोव्याख्यातः॥ एतेनैव प्रकारेण अस्त्रिद्व्यसमासकर्ण
नेन त्रिकर्णसमासः॥ त्रिकर्णानां त्रयाणां अस्त्रीणां समासएकीकरणं व्याख्यं
तं कथितं एकैकं दीर्घं चतुरस्रं विधाय ततउक्तविधिना समस्येत इत्यर्थः॥ पंचक
र्णानां च पंचकर्णीनां पंचानां अस्त्रीणां च समासएतेनैव प्रकारेण व्याख्यातः॥ ज
घन्यतः प्रउगविधिना हे हे समस्य चतुर्भुसमं चतुरस्रीकृते षु पंचमं चतुरस्रीकृत्य
नानाप्रमाणसमासविधिना मध्ये क्षिपेदित्यर्थः॥ प्रउगेऽपछिद्रैकर्णानां॥ २४
एकैककर्णीनां तुल्यकर्णानां पंचस्त्रीणां प्रउगे पछिद्रोक्तरित्या समासः
कार्यः॥ द्विकर्णीनां च समं चतुरस्रं पछिद्रं॥ द्विकर्णीनां नानाविधकर्णीनां पंचे

स्त्रीणां मध्ये मथा योगमेकैकविधकर्णीक्षेत्रं द्व्यंसमं चतुरस्रीकृत्य रुस्वक
रणया वृद्धकरणी॥ मपछिद्रनानाप्रमाणे युक्तविधिना समासः कार्यः॥ ७॥ ॥इ
तिनील्वि विरचिते महीधरविनिर्मिते समासकथनं नामचतुर्थकंडिकागमत्॥ ५॥ ॥च
यने द्विधुरुषारज्जुं मित्वा भगतः पार्श्वं मध्ये लक्षणमित्यादिसूत्रैः प्रथमाग्निक्षेत्रसा
धनं कल्पेएवोक्तं॥ संप्रति विधइत्युच्यते तत द्वक्ष्यामः॥ उत्तरेषु पुरुषोच्चयेनैक
ज्ञानविधादितियत्कात्यायनेनकल्पेउक्तं॥ एतत पुरुषोच्चयविधानं वक्ष्यामः॥
कथयिष्यामः॥ उत्तरेद्वितिकल्पसूत्रं स्यात्यमर्थः॥ उत्तरेषु द्वितियादिचयनेषु
पुरुषाच्चयेनपुरुषस्योच्चयेन वृद्ध्याएकैकपुरुषवृद्ध्याग्निमानेनवति॥ कियत्पर्य
तमतआह॥ आएकज्ञानविधात्॥ एकज्ञानविधपुरुषपर्यंतं॥ आद्योग्निःसार्ध

सप्तपुरुषक्षेत्रफलकः सप्तविधः द्वितीयोऽष्टविधः तृतीयो नवविध इत्यादिकस्त्रि
तविधपुरुष पर्यंतं पंचनवतिः अश्वमेधेचद्वावेतौन्यौ द्विगुणत्रिगुणसंज्ञौव
क्षमाणौ एवसप्तनवतिरग्निचयनमेदा इत्यर्थः॥एवंपुरुषोक्तयोर्मध्येउक्तस्तंवक्ष्या
मः॥तत्रादावश्वमेधिकंचयनमेकत्वसंख्यमाह॥आद्योग्निर्द्विगुणस्त्रि
गुणो नवतीति [illegible] सर्वसमासः॥आद्यः प्रथमोऽग्निःसार्द्ध
सप्तपुरुषक्षेत्रफलकः सद्विगुणो नवति। त्रिगुणश्च नवति॥इत्येवंसर्वसमास
र्वस्मपक्षपुच्छसहितस्मक्षेत्रस्मसमासकार्यः॥अयमर्थः॥सार्द्धसप्तपुरुषक्षेत्रफलं २५
आद्याग्निक्षेत्रपक्षपुच्छसहितं नानाप्रमाणसमासइत्यादुक्तोपपत्तेसमचतुर
स्रंकार्यं॥तस्मकरणीतृतीयांशयुतानिसप्तविंशतिपदानिपंचत्रिंशत्पदानिचस्युः॥ ५

तस्माच्छ्रोणीरज्जुर्द्विकरणीत्यादुक्तरीत्यातस्मात्सार्द्धसप्तपुरुषक्षेत्रफलकस्यस
मचतुरस्रस्याक्ष्णयारज्जुरुपयाकरण्याकृतंचतुरस्रंपंचदशपुरुषक्षेत्रफलकं
भवतिसद्विगुणंतन्मानेनचयवह्नयन्यूनवर्गोनाधिकान्यष्टत्रिंशत्पदानि॥एवं
तत्त्रिकरणीवर्गविधिनासाधितयाकृतंचतुरस्रंसार्द्धद्वाविंशतिपुरुषक्षेत्रफलकं
द्वियवाधिकपंचांगुलोपेतसप्तचत्वारिंशत्पदकरणीकंत्रिगुणमग्निक्षेत्रंत्रिगुण
नामकंनवति॥तत्रचद्विगुणत्रिगुणाग्निक्षेत्रयोरानयनकरणीद्विपुरुषारज्जुरि
तिव्यवहार्यौ॥तयाद्विपुरुषंरज्जुमित्येत्यादिकत्योक्तप्रकारेणपक्षपुच्छसहितं
आत्मासाधनीयः॥इदंचाग्निकर्मपंचनवतोऽन्यत्रचाश्वमेधिकंवेदिज्ञानयोश्चतु
र्ज्ञविधैकविंशतिविधयोरिवक्रमात्तेषामन्यानुपदेक्ष्यामः॥कात्यस्त्रेऽश्व

मेधप्रकरणेऽक्रमाग्नेर्द्विगुणस्त्रिगुणएकविंशतिविधइतितत्रद्विगुणत्रिगुणा
वुक्त्वैकविंशतिविधमाहाग्नेएकविंशतिविधोभवतीतियदुक्तंतत्रपुरुषाभ्यासःकार्यः
सप्तविधाग्निक्षेत्रेष्वेकैकपुरुषाभ्यासेनाष्टविधादिषुजायमानेषुचतुर्दशपुरुषा
भ्यासेएकविंशविधोभवतीत्यर्थः॥पुरुषाभ्यासप्रकारमेवाह॥पुरुषाभ्यासेभवा
नग्निःसपक्षपुच्छविशेषस्तावच्चतुरस्रंकृत्वातस्मिन्पुरुषप्रमाणमवदध्यात्।
पुरुषाभ्यासेक्रियमाणेसपक्षपुच्छविशेषःपक्षपुच्छलक्षणेनविशेषेणाधि २६
मानेनसहितोभवानग्निःसार्द्धसप्तपुरुषःक्षेत्रफलकःस्यात्॥तावच्चतुर
स्रंकृत्वानानाप्रमाणसमासविधिनासमंचतुरस्रीकृत्यतस्मिन्चतुरस्रीकृतेग्नौ
पुरुषप्रमाणंसाधिमानंपुरुषक्षेत्रमवदध्यादाचयेत्॥नानाप्रमाणसमास

विधानेनैवपुरुषःप्रमाणंक्षिपेत्॥एवंसार्द्धसप्तपुरुषात्मकंचतुरस्रंभवति॥तत्र
द्वितीयचयनेकियान्पुरुषभागः॥प्रक्षिप्तइत्याहुकामोतत्रक्षिप्तंपुरुषमानं
पृथग्दर्शयति॥समस्तंपंचदशभागान्कृत्वाद्वादशसमासेनसमस्मिन्पुरुषः
समस्तंकृतपुरुषप्रमाणसमासंसार्द्धसप्तपुरुषक्षेत्रफलकंसमंचतुरस्रंपंचद
शभागान्कृत्वापार्श्वमान्योस्त्रियोऽन्योर्तासमंपंचदशधाविभज्यैकोभागोपंचद ३
शोद्वौद्वौचतुरस्ररूपौएकसमासेनसमस्यैतन्नानाप्रमाणसमासविधिनासम
चतुरस्रंकुर्यात्॥सपुरुषः॥तत्पुरुषप्रमाणमित्यर्थः॥अत्रपंचदशांशेशुल्ब
गुलविस्तारंविंशत्यधिकशतांगुलदीर्घंक्षेत्रंभवतिदीर्घचतुरस्रात्मकंनवति।
तदयंसमचतुरस्रीकृतंपुरुषप्रमाणंनावद्द्वितीयनेवर्तत इत्यर्थः॥अत्रा

एकत्रातविधादेवमेवपंचदशभागद्वयेनहृद्विर्नवतितत्तृतीयचयनादौपंचदश
भागद्वयमर्द्धिमविनागरूपेनवति॥पुरुषप्रमाणस्यदृष्टप्रयोजनमाह।
तस्यहस्तेनपादमात्रीभवतिपंचमेनवृहती॥तस्यसमचतुरस्रीकृतस्यपुरु
षप्रमाणस्यदशमेनकरणीदशमोनेनपादमात्रीपद्यानामेष्टकाभवति।पु
रुषकरणीदशमोभागःपद्माकरणीक्षेत्रफलतृतीयोभागः॥पंचमेनवृहती न
पुरुषकरणीपंचभागेनक्षेत्रफलेपंचविंशतिभागेनवृहतीनामेष्टका॥वृह
त्याकरणीत्यर्थः॥पद्मावृहत्योःकथनमन्यासमुपलक्षणंकृतंपद्माकरण्यर्द्धपाद २७
नागापादोनावृहतीकरणीजंघामात्रीवृहत्यर्द्धमर्द्धवृहती॥पद्मार्द्धमर्द्धपा
द्यापादनागार्द्धमर्द्धपादभागात्तदर्द्धंचतुर्नागापादमात्रविस्तारजंघामात्री

दैर्घ्यार्द्धजंघामात्रीविस्तारभवृहतीदैर्घ्यीत्रिग्राहिणीत्यादिज्ञेयं॥पुरुषव
र्द्धनेयुक्तंतरमाह॥पुरुषंवापंचमेनोभयतोपल्लिख्यपंचभागान्समस्यतृतीयंनिः
कृत्यतस्मिंपुरुषप्रमाणेऽवदध्यादित्यपरं॥वाशब्दःप्रकारांतरद्योतकः॥अ
परंअग्निक्षेत्रेवर्द्धनेप्रकारांतं॥इतिएवंकार्यं॥तदेवाह॥पुरुषंचयेनभागेनोभयतः
पार्श्वमानीतिर्यङ्मानेनोत्कीर्यविभज्यपुरुषंचतुरस्रीकृत्यपंचकरण्याचतुरस्रं
कृत्वातृतीयंनिकृत्यपंचकरणीकृतंचतुरस्रंत्रिधाकृत्वातृतीयंभागंनिःकास्य
वस्त्रिष्वंसभागद्वयंचतुरस्रीकृत्यपुरुषतउभयतःपंचधाछित्वापंचविंशतिकोष्ठान्
कृत्वातन्मध्येपंचभागान्समस्यपंचकोष्ठान्पंचमांशरूपान्समचतुरस्रीकृत्य
प्रमाणक्षेत्रेनानाप्रमाणसमासविधिनातद्भवेत्॥सोष्टविधोदोपुरुषोभवति।

अस्मिन्नपि पक्षे पुरुषः क्षेत्रस्य पंचमे भागे चतुर्विंशत्यंगुले विस्तारं विंशतिसहित
शतांगुलदीर्घं चतुरस्रं नवतितमस्य तृतीयभागे निष्क्रान्तेऽङ्गांगुलविस्तारं विं
शतिशतांगुलदीर्घं चतुरस्रं क्षेत्रं भवतीति तावदेवायतिस्यदशमेनपादमात्री
पंचमेनबृहतीद्वयात्रापिसमानं पुरुषं पंचदशभागान्कृत्वेत्यत्र पंचदशभागः कि
यान्भवतीति सूत्रार्थमाह।पंचदशभागो ह्यंगुलः।पुरुषः करएवाः पंचदशा
भागोऽष्टांगुलात्मको भवति।तद्यथेषोऽङ्गांगुलविपुलेविंशतिशतांगुल
दीर्घक्षेत्रे तदावापेक्षतेपुरुषोवर्द्धितोभवति।अरत्निर्वितस्त्यंगुलशता ९८
नांलोकप्रसिद्धानोमानमाह।पंचारत्निर्दशवितस्तिर्विंशतिशतांगुलः।।पुरु
षइत्येतस्माद्दशांगुलंपदमस्यच।।पुरुषःपंचारत्निः।।पंचअरत्नयोमान

स स्यैपंचारत्निः।।दशवितस्तयोयस्यसदशवितविंशतमंगुलानियस्यसविंश
तिशतांगुलः।।इतिअरत्न्यादिमानं।।एतस्मात्पुरुषात्ज्ञेयं।।पदंचाष्टांगु
लमित्यधिक्रियते।।अयमर्थः।।सर्वत्रोक्तिःपुरुषादधिकस्तस्मिंपंचदशांशाद्ध
यरूपपुरुषप्रमाणचतुरस्रस्यकरणीपंचमभागोरत्निः।।पुरुषःकरणीद्व
यमेनेत्यवितस्तिः।।विंशतिशतमेभागेगुलं।।पदंचाष्टांगुलमितिस्मृ
त्यर्थमुक्तं।।पुरुषेज्ञेयेतृतीयंप्रकारमाह।।पुरुषंवासमंमेनोभयतोपछि
द्यसमभागान्समस्यसमभागमंगुलंनिर्हृत्यपुरुषप्रमाणवदध्यार्द्धित्यपरं।।
पुरुषंपुरुषप्रमाणंसाधितंसमचतुरस्रंसमंमेनस्यसमंशेनोभयतःपार्श्व
स्थेतिर्यंञ्चान्योःपार्श्वमान्यास्त्वापछिद्यविभज्यएकोनपंचाशत्कोष्ठान्कृत्वासम

भागान्समस्य पुरुषस्य मांशरूपान्समभागान्समकरणांस्चतुरस्रीकृ
त्यससप्तमभागमंगुलेन्निर्हत्यसप्तमभागेनांगुलसप्तमांशेनसहितमंगुल
मेकंसप्तभागचतुरस्रादपनीयशेषंचतुरस्रीकृत्यपुरुषप्रमाणेवदध्यान्नि
क्षिपेत्॥इतिअपरंपुरुषाक्षयविधानमितिशेषः॥अयमर्थः॥अंगुलसप्त
मांशसहितसप्तदशांगुलविस्तारंविंशतिशतांगुलदीर्घंभूमिंदीर्घचतुरस्र
रूपंसमचतुरस्रीकृत्यसप्तमांशसहितमंगुलंतस्मात्॥सप्तभागकृतचतुर
स्त्रदायनामशेषंसमचतुरस्रीकृत्यनानाप्रमाणसमासविधिनापुरुषप्रमा
णसमासविधिनापुरुषप्रमाणक्षेत्रेआवपेत्सबहिसार्द्धसप्तमांशःपुरुष
इतिअस्मिन्नपिपक्षेपूर्वप्रकारद्वयेक्रमेवायातितथाहि॥पुरुषक्षेत्रस्यस

२९

प्तमोभागोंगुलसप्तमभागयुक्तसप्तदशांगुलविस्तारंविंशतिशतांगुलदीर्घं
क्षेत्रंतस्मात्सप्तसप्तमभागेंगुलेयनीतेषाडशांगुलविस्तारंविंशतिशतांगुलदीर्घ
क्षेत्रमवशिष्यतेहस्तिः॥तस्यदशमेनपादमात्रीभवतीत्यत्रापिसमेनवविधादि
ष्वपिएवमेवबोध्यं॥अधिमानरूपाणिमरत्निवितस्तीनांपुरुषप्रक्षेपेणकार्यइ
त्यादनारत्निवितस्तिनांसमासोविद्यतेसंख्यायोगादितिसूत्रतेः॥अरत्निवित
स्तीसमासः॥पुरुषमध्येप्रक्षेपानास्तिजाधिमानभूतायाअरत्निवितस्तय
स्तासांपृथग्वर्द्धनमेवोक्त्वापुरुषाणामेववर्द्धनंनारत्यादिसमासेनसंख्या
योगादितिसूत्रतेः॥यतोहस्तनवतिविधेचयनेचतुर्हस्तारत्नान्दक्षिणेपक्षेउ
पदधाचतुर्हस्तारेचतुर्हस्तवितस्तीपुच्छेउपदधातीतिसूत्रत्वारत्न्यादिषुवर्द्ध

नार्थः संख्यायोगः शुभगुच्यते॥अतः समविधएकविंशतिविधोऽष्टानवविधएक
शतविधइतिपुंसामेवनारत्न्यादिसमासेनेत्यर्थः॥४॥ ॥इतिश्रौत्वेविवरणे
महीधरविनिर्मितेपुरुषाख्यकस्यकथनंपंचमीकंडिकागमात्॥॥ पुरुषाख्ये
वेदेरिष्टकानांचोच्चयोविधेयस्तद्वक्तुंप्रतिजानीते॥यथाग्निंवेदिष्टकाः प्रमाणं
न वर्धतइत्येवंरूपंवक्ष्यामः॥यथाग्निंवेदिष्टकाप्रमाणंवर्धतइतिमत्कल्पकारेणोक्तंव
क्ष्यामः॥वृद्धिप्रकारंकथयिष्यामः॥कल्पसूत्रार्थस्त्वयंवेदीश्चइष्टकाश्चवेदिष्ट
काः॥तासांप्रमाणंयथाग्निर्नवति॥अग्निमनतिक्रम्यमयाग्निअयमर्थः॥अ
ग्निक्षेत्रप्रमाणंयथावर्धते॥तथावेदिप्रमाणमिष्टकाप्रमाणंचवर्धतइति॥वे
दिर्हिवर्धिनावर्धितस्याग्नेर्मानासंभवात्॥अवर्धिताचेष्टकावर्धितमग्निक्षेत्रं

नपूरयंतीतिवेदिरिष्टकानांयथाग्निवर्धनंभवति॥तत्रतस्यदशमेनभागे
नात्मान्यादिनेष्टकाहृद्धिरुक्तैव॥अत्रपुनरिष्टकाग्रहणंकल्पसूत्रानुवादात्वे
दीवर्धनंप्रक्रमकथनेनैवभवतीतिचरमेचयनेप्रक्रममाह॥
याकरणीचतुर्दशप्रक्रमान्संक्षिपतित्रीश्चप्रक्रमसप्तभागात्मएकशतविधे
प्रक्रमः॥याकरणीचतुर्दशप्रक्रमान्तथाप्रक्रमस्यत्रीन्सप्तमभागान्संक्षि
पतिसमश्चतुरस्त्रीकरोति॥सएकशतविधेतिमेचयनेप्रक्रमोभवति॥अ
यमर्थः॥त्रिपदकरणीकसमश्चतुरस्रस्यषष्ठोभागःषट्त्रिंशद्गुणाय
ोःगुणसप्तमांशसहितपंचांगुलविस्तारोभूभागः॥सत्रिगुणःकृतःपंचद
शांगुलानित्रिसप्तमभागयुतानिविस्तारेषट्त्रिंशद्गुणान्यायामेनभवति॥त

ऋंतुस्त्रीकृत्यया करणी चतुर्दशकरणी गुणं त्रिपदकरणीकं संक्षिपतितत्कर
णीकं चतुरस्रिनानाप्रमाणसमास विधिनातंप्रक्षिपेत्॥ततक्षेत्रस्यकरणीए
कऋतविधेचयनेप्रक्रमवाच्या॥तेनप्रक्रमेणप्रक्रमनिवृद्धिर्दि॥साध्यास्चां
तिमचयनप्रक्रमः किंचिदूनसप्तत्रिंशदधिकऋतौ गुणप्रमितोभवति॥तच्चैवं
विधेयंपूर्वमग्निक्षेत्रंसार्धसप्तपुरुषात्मकंसमचतुरस्रीकृतंस्वसप्तमभागे
नद्वितीयचयनेवर्द्धते॥एवंतृतीयादिषुपिण्डैकोच्चयेनस्वसप्तमभागवृ
द्धिः॥तृतीयेद्वौसप्तमभागावधिकौ॥चतुर्थेत्रयः॥पंचमेचत्वारः॥षष्ठेपं ३१
चसप्तमेषट्॥जष्टमेप्रथमक्षेत्रस्यद्विकरणी॥एवंक्रमेणपंचनवतित
मेचयनेचतुर्णवतिंसप्तभागावर्द्धते॥तत्साधनोपायस्तुप्रथमचयनपाद्या

प्रमाणेनप्रथकचतुर्दशचतुरस्त्राणिसंसाध्य॥तानिनानाप्रमाणसमास
विधिनैकीकृतंतच्चतुर्दशकरणीकमेकंचतुरस्रंसाधयेत्॥ततःपद्याप्रमाण
क्षेत्रंसप्तधाविभज्यतस्मात्रीन्भागान्समस्यचतुरस्रंकृत्वातत्सप्तमभागत्रय
साधितंचतुरस्रंचतुर्दशकरणीकेचतुरस्रिनानाप्रमाणसमासविधिनाऽऽ
वपेत्॥तदावापेकृतेपावच्चतुरस्रंजायतेसैकऋतविधेपद्यादृशभिः पद्या स्तापिः
निर्दक्षिणेऽग्नावुत्तरेवापरंवापंक्त्यास्थापितानिरेकःपुरुषःएवंविधेनपुरुषेण
द्विपुरुषोरज्जुमित्येत्यादिकल्पेनऋविधिनात्मपक्षपुच्छादिकंसाध्या एवंविधा
भिस्तिसृभिःपद्याभिर्वापरस्थापितानिरेकःप्रक्रमइतिद्वितीयेचयनेप्रक्र
ममाह॥द्वितीयेवासप्तमंप्रक्रमेषुप्रक्रममषधायतस्यसप्तमभागेनप्रक्रमा

र्थः॥ह्वाचधारणार्थः॥ द्वितीयेऽष्टविधेऽग्नौसप्तसुप्रक्रमेषुएकंप्रक्रममवधाय॰
प्रक्षिप्यतादृक्स्यप्रक्रमस्यसप्तमभागेनप्रक्रमार्थकंकार्यः॥अयमर्थः॥त्रिपादप्रक्र
मप्रमाणानिसप्तसमचतुरस्राणिसमस्यैकंचतुरस्रंकृत्वातत्रत्रिपदप्रक्रमचतु
रस्रमावपेत्॥ततस्तस्यवर्द्धितक्षेत्रस्यसप्तमोभागस्तंसमचतुरस्रीकृत्यत॰
स्यकरणीप्रक्रमकार्यद्वितीयेचयनेविधेयंऽएवमपिप्रक्रमसप्तमांशाद्वृद्धिक॰
थिताप्रकारांतरमाह॥प्रक्रमेणवासप्तमभागेनप्रक्रमार्थः॥यद्वासप्तमभागस
हितेनप्रक्रमेणप्रक्रमद्वितीयेचयनेकार्यः॥अयमर्थः॥एकमेवत्रिपादप्रक्रम॰ ३२
क्षेत्रंसप्तसमविभज्यस्वसप्तमभागंचतुरस्रीकृत्यप्रक्रमक्षेत्रेआवपेत्तानाप्र
माणसमासविधिनातत्तत्सप्तमांशविशिष्टंप्रक्रमक्षेत्रंकृतकरणीद्वितीयेचयने

प्रक्रमकार्यकर्त्तव्यंनवविधेतृतीयेचयनेप्रक्रमक्षेत्रस्याष्टौसप्तमभागौप्रक्रम॰
क्षेत्रमध्येप्रक्षेप्यौचतुर्थेत्रयः॥पंचमेचत्वारः॥षष्ठेपंचसप्तमाः॥सप्तमे॥षट्॥अष्टमे
चयनेप्रक्रमक्षेत्रद्विकरणीप्रक्रममानमित्याहूहनीयं॥यद्वातृतीयेचयनेप्रक्र
मक्षेत्रद्विकरणीसमचतुरस्रंकृत्वातस्यसप्तमोभागःप्रथमचयनप्रक्रमक्षेत्र
व मध्येऽवपनीयः॥चतुर्थेत्रिकोणसाधितस्यसप्तमोभागःपंचमेचकरणीसा
धितस्यसप्तमः॥अष्टमेपंचकरणीसाधितस्यसप्तमः॥अष्टमेप्रक्रमद्विकरणीमे
वप्रक्रमकार्यमित्यादि॥एवमेकज्ञातविधात्॥एकज्ञातविधाचयज्ञात्॥आए
कज्ञातविधपर्यंतंएवमेवाभ्यस्तात्सप्तमांशाद्वृद्धिप्रक्रमेप्रक्षेप्या॥चतुर्नवति
समांशेषुप्रक्रमेक्षिप्तेषुएकज्ञातविधेप्रक्रमोभवतिअंतःपात्यगार्दपत्यमोद्व॰

द्धिप्रतिषेधः॥नांतःपात्यगार्हपत्ययोर्वृद्धिर्भवति॥तावद्वेदयोर्निर्भवतिनवै
जातंगर्भयोनिरनुवर्तते इतिश्रुतेः॥वृद्धेरत्यंतप्रतिषेधः॥अंतःपात्यगार्हप षेधः
त्ययोर्न्निवर्तिताउरवाग्निस्थानेऽग्निमात्रविस्तारमंडलानागार्हपत्यशब्देना
मते॥तस्मात्सूर्वमाँवेद्यंतपर्यंतंप्रक्रमत्रयपरिमितोभूभागोंऽतःपात्यं॥
अत्रत्रिपदःप्रक्रमः॥तयोर्हितीयादिचयनेषुअग्निक्षेत्रवेदीष्टकावृद्धिःप्रा
तिषिध्यते॥कुतः॥तावद्वेदयोर्निर्भवति॥अंतःपात्यसहितागार्हपत्य
चितिश्रुतावग्नेयोनित्वेनोक्ता॥तावत्क्षेत्रंवेदिनित्यापिवृद्धिःकर्यंकार्ह ३३
यतिइत्यतआह॥नवैजातंगर्भयोनिरनुवर्तते इतिश्रुतेः॥जातंगर्भंअ
नुगच्छतीत्यत्रेवश्चायोनिर्नवर्तते॥यावद्योनौगर्भस्थितस्तावज्जन्मवृद्धनुसा

रेणयोनिर्वर्तते॥गर्भोत्पत्तेरंगर्भएववर्तेनयोनिरितिश्रुत्योक्तत्वात्॥
अंतःपात्यगार्हपत्यचित्योरत्यंतवृद्धेः प्रतिषेधः॥एवंशुल्वकारेणात्रतयोर्वृ
द्धिः प्रतिषिद्धा॥कल्पकारेणतुअंतःपात्यगार्हपत्ययोरिष्टकानिर्मितिकल्पएवो
क्तः॥श्रुतावपिविहितप्रतिषिद्धत्वाद्विकल्पोवभासते॥अनेकचतुरस्रस
मासउक्तस्तथापितत्करणप्रकारंतरमाह॥यावत्प्रमाणानिसमचतुरस्रा
एषैकाकर्णचिकीर्षदेकोनानितानिभवंतितिर्यग्द्विगुणान्येकतएकाधि
कानिआस्त्रिभवंतितस्येष्टकरणेति॥यावत्प्रमाणानियावत्संख्याकानिस
मचतुरस्राण्यसमानानिएकाकर्णचिकीर्षन्॥समसिलुमिछतएकोनानि
तानिएकरहितसंख्याकानितानिद्विगुणानिसंतितिर्यक्भवंतिएकहीनत

चतुरस्राणां द्विगुणानां पंक्तिस्थापितानां मध्यसूत्रं अधतिर्यङ्मानेनाकर्षणीये स
म्यक्॥एकाधिकानि तानि एकतः॥एकाधिकतावत्संख्यं पंक्तिस्थापितं चतुरस्रम
ध्यसूत्रेणैकतोन्यच्चतिर्यङ्मानंतद्दयादारभ्यापरिग्रस्त्रिःप्रादेशायथाभवतित्रि
कोणंयथातस्यातथास्यातथाभुजद्दमत्वेनोपरिमितिताग्रद्दयस्थापनीयं॥तस्मिंषु
शरत्करोतितावत्संख्यमाकचतुरस्रसमासं करोतिक्षेत्रफलेन॥तस्यत्रिकोणस्य
शरोनामोर्ध्वकोणमारभ्यास्तिर्यङ्मानीमध्यपर्यंतस्थापितजंवस्त्रोर्द्धमित्यर्थः
यूपेकादशीत्यंवेदिवर्द्धनंवक्ष्यतिजानीतेतिमथायूपंवेदिवर्द्धनविधिकथयि ३५
ष्यामः॥यथायूपंयथायूपांतरा नानिरक्षमात्राणितथावेदिवर्द्धनंविद्येयं
यूपेकादशिनीचेद्दथाक्षमात्राएवंतराणि॥पूर्वार्द्धवासमंचिन्मज्येतिकल्पकारेज्यो

तिष्टोमे॥यूपेकादशिनीपक्षेउक्ता॥एकादशानांवर्गएकादशानीतत्रैकादशयू
पस्थापनेपक्षद्दयमुक्तंयूपानामिकादशिनीचेत्प्रतियूपंरथाक्षमात्राणिअंतरा
लानिमुक्त्वायूपांतरस्थापनंद्वितीयःपक्षःयद्वापूर्वार्द्धप्राक्तप्रमाणेवेदेरेवपूर्वा
नागएकादशधाविभज्यैकादशयूपान्निखनेत्यपरंपक्षः॥तत्रपूर्वार्द्धसमविभा
गपक्षेवेदिर्द्विगुणीस्यात्॥यूपानांरथाक्षमात्रांतराजपक्षेवेदिर्द्विरवयवमपेक्षि
ता॥अन्यथाअंतर्वेदिमितोत्सर्यमथोवितीनस्यात्॥एवंप्रतिशाखंवेदिर्द्विगुणा
यारज्जुरेकादशेनपरवान्संक्षिपतिदशचरथाक्षांस्तस्यायःश्चतुर्विंशोभागःसमे
क्रमः॥यारज्जुरेकादशसंख्याकानुपरवान्यूपरवननार्थंगर्त्तान्दशांगुल
प्रमाणान्ददातथादशरथाक्षान्दशसंख्याकान्निरथाक्षमात्राणिचतुरधिकशर

तांगुलमितान्यंतरालानि चसंक्षिपतिमिनोति॥ एतावतातावदायतारज्जुःसा
चतुर्विंशत्यंगुलाधिकाष्टचत्वारिंशदरत्निमिताभवंति॥ तस्यामत्रतुर्विंशेभाग
सहितमेकमङ्गुलंहावरत्नीच॥ सप्तक्रमान्मूपेकादक्षिण्यांएतावत्क्रमम
माणमित्यर्थः॥ तेनवेदिमानंकुर्यादित्याह॥ तेनवेदिंनिमिमीतादङ्गांगुलंपुर
स्तादक्षिण्यतोमूपावधायाङ्कोःपुरस्तान्मोचमवधायतस्मिन्मूपानिमिनोतितेनप्र
वोक्तेनप्रक्रमेणवेदिनिमायषड्भिरात्मक्रमाप्राचीत्यादिविधिनावेदिंकृत्वापु
रस्ताद्देःपूर्तनागेहादङ्गांगुलंअपच्छिद्यहादङ्गांगुलप्रमाणविस्तारंदक्षि ३५
णेनरयोस्कहासप्तत्यधिकेकादशशतांगुलायतंवेद्यंशंयूपावद्यङ्कोवेद्यासह
यावदङ्गांगुलसूत्रस्याधस्तादानेनतावंतंवेदिपूर्तनागंछित्वातत्॥ तछिन्नंवेदिः

भागंयूपावद्यात्॥ यूपस्यावद्येत्तिनवोयूपावद्यः तस्मात्शंकोर्जातप्राचंअव
धायपूर्वापरं॥ पुनःकृत्वावेदेस्त्रिष्वायांशंयोज्यतस्मिन्हित्वापूर्वापरयोर्जितेवे
दिर्भागेयूपान्निमिनोति॥ एकादङ्गांगुलैःपुरयाक्षमानांतरालेप्रक्षिपेत्॥ इतिपूर्व
पक्षःसिद्धांतमाह॥ पार्श्वयोर्वाहमंतरवेदीतिश्रुतेरर्धकान्॥ वाशब्दःपूर्वपक्ष
निवृत्त्यैपार्श्वयोर्यूपावद्यंशंकोर्दक्षिणेत्तरभागयोरुत्तरदक्षिणभागयोर्वा
अर्धकान्अर्धान्पंचपंचसंख्याकान्एकैकक्रमेणयूपान्मिनोतिप्र
क्षिपतीतिशेषः॥ अर्धकानितिकेयूपानांप्रथमोयंसिद्धः॥ अयमर्थः॥ मध्य
मंपरित्यज्यैकोदक्षिणेवान्यत्यासंमितरनितिकल्पकारोक्तः प्रथममध्यम
यूपंनिखायतस्मादुत्तरेद्वितीयंद्वितीयादुत्तरंचतुर्थंदक्षिणेतृतीयादक्षि

एंपंचमं॥ नवमादक्षिणमेकादशमिति॥ दक्षिणंवेदिपक्षेमध्यमंनिरवायतस्मा
दक्षिणंद्वितीयं॥ मध्यमादुत्तरंतृतीयंद्वितीयादक्षिणंचतुर्थी॥ तृतीयादुत्तरंपं
चमंचतुर्थं॥ दक्षिणंषष्ठंपंचमादुत्तरंसप्तमं॥ षष्ठादुत्तरंनवमं॥ अष्टमाद
क्षिणंदशमं॥ नवमादुत्तरमेकादशमिति॥ एवमुदीचीयूपपंक्तिःकर्त्तव्याधेये
मं तिचेदंतआह॥ अर्द्धांतरवेदेतिश्रुतेः॥ अर्द्धमंतरवेदेर्मिनोत्यर्द्धंबहिर्वेदीति
श्रुतेः॥ दशरंगुलागर्त्तास्तथाविधेयायथागर्त्तार्द्धंवेद्यामायातिगर्त्तार्द्धमप
न" रंबहिः॥ एवंचकृतेवेदिरर्द्धमपिसार्द्ध[illegible]कंरपानांवेदीस्पर्शंगर्त्तार्
अपिवैनैवक्रमेणविधेयाः॥ यूपाश्चदक्षिणंयूपमारभ्यैकैकोरत्निहानाः
कार्यादक्षिणःषड्विंशात्यरत्निः॥ वर्षिष्ठोदक्षिणोऽनुपूर्वइतरइत्युक्तः॥ पूर्वप

ना क्षसूत्रेकथितप्राचीयूपपंक्तिस्तुतीवसुतीयागेतेयातत्राग्निष्ठोयूपोवर्षिष्ठोभवति॥ वेद्यु मे
षष्टेदक्षिणस्यांदेवीसंबधोऽग्निष्टुत्सेवेति॥ मतांतरमाह॥ एकेप्रथमोत्तमोमध्यमःप्रकृतिव
त्॥ एकेआचार्याःप्रथमोत्तमोआद्यांत्योयूपौप्रकृतिवदिहंप्रकृतौस्तोमाभवेयुरेक
एवयूपोवेदीमध्यगतार्हः॥ तथायूपेकादशमाद्यांत्योवेदिगतार्हेनिवास्ये
बहिर्वेदीति॥ तस्माद्विकल्पःवर्षितावर्षितयूपेकादशिनंवेदेनामाह॥ सेषाशि
खंडिनीवेदिः॥ साएषापुरोडाशेकादशिनायुक्तावेदिर्वर्षिताप्यवर्षिताप्यवर्षिता
पिशिखंडिनीत्युच्यते॥ शिखंडिमयूरकलापाकारयूपाग्रस्थाःसाशिखंडिनी
एकादशयूपानांपूर्वस्मिंस्तानांशिखंडिकारतयावर्णसमानत्वादेषावेदिःप
क्षिमाशिमुखोर्द्धकलापन्नत्वन्मयूरसदृशत्वात्॥ शिखंडिनीतिनामोच्च

ते॥ भवंतिचात्रश्लोकाः॥ अत्रसूत्रोक्तेऽर्थेश्लोकाअपिकेचनविद्यंते॥ शुल्व
कारकृताएव॥ एतत्रंथाधिकारिनिरूपणमश्लोकाः॥ ॥संस्थानतः॥ प
रिमाणतःसमसूत्रनिरूपकः॥समभूमौभवेद्विद्वांछुल्वविन्मरिष्टलक्षकः॥१
शास्त्रबुद्धिविभागज्ञःपरशास्त्रकुतूहलः॥शिल्पिभिःस्यपतिष्यश्चाप्तदृ
ष्ट तमतोःसदा ॥२॥तिर्यङ्मान्यांसबाधेःपार्श्वमान्यांश्चयोगवित्॥करणी
नांविभागज्ञोनित्योद्युक्तश्चसर्वदा॥३॥तथाभूसमत्वायोपायः॥ नजलात्समम
न्यत्तुनान्मृल्लात्समंभवेत्॥नान्यधारंचमाद्र्धंनान्यसूत्राद्दृढंभवेत्॥ ३७
ध॥ रज्जुलक्षणं॥ षडंगुलपरीणाहंद्वादशांगुलमुच्छ्रितं॥जरठंवंशजंवेत्रं
कुंकुमद्विशतंतः॥५॥एकतक्षरुजुस्तीक्ष्णःखादिरसममामतः॥रज्जुकृ

णीयंत्र

र्यस्तुशुल्वंतस्तथार्द्धंगमयन्मही॥६॥प्रादेशमात्रोहविर्मंतेपूर्वलक्षणलक्षितः।
रज्जुरामशिराःकार्यस्तस्याग्रंछिन्नरंध्रतः॥७॥आमशिराअशुष्कशिराः॥
वि मुद्गरलक्षणं॥ द्वितस्तिप्रमाणस्तुखादिरोमुद्गरोभवेत्॥रज्जुस्तेननिखे
यःस्यान्नस्मात्तस्यपरिग्रहः॥८॥चतुरस्रंसुद्गरंकृत्वाषोडशांगुलमाय
अधिद्र तं॥प्रमध्येविद्ध्वरमेणदारुमध्यंचनिर्मितं॥९॥रज्जुलक्षणं॥अजी
र्णग्रंथिनासूक्ष्मासमाश्लक्ष्णात्वरोमजा॥रज्जुर्मुंजाधिकाकार्या
अक्षरेयोगमिछता॥१०॥वृक्षगोवाबाल्वजोवापिवेणवोवाविधाये
ते॥रज्जुश्चानयतःपाशाश्चित्रतायज्ञकर्मणि॥११॥रज्जुर्मुंजमयी
कार्पाशीवाऐसुपरिमिश्रिता॥कात्यायनोवदत्येवमरनंडाकुशवल्व

जैः ॥१२॥ शंकुसमीकरणं ॥ शंकुस्त्रिभज्याभक्तो द्वादशगुणः पंचनागिकाः शं
नाकाष्टनंदिरुद्रैर्भाजितः शंकुसमकृज्जायते ॥१३॥ प्राचीनानामाह ॥ कृत्तिकाः
श्रवणः पुष्यश्चित्रास्वात्योर्मध्यंतरगणतत्सायदिनैः कृतयुगमात्रोदितेषु
रविषु ॥१४॥ चतुरस्रसाधनं ॥ यावत्समागणः ऋजुः स्यात्तावानेवागमो भवेत् ॥
आगमार्द्धेन शंकुस्यादंतरद्वि निरंछनं ॥१५॥ आधानेपदिकं कुर्यात्तेनो
मेनुद्विपदोनवेत् ॥ अग्नीन्चित्रिपदंकुर्यात्तत्रकर्मोपयज्ञिको बुधः ॥१६॥ पंच
दश्रमेकविंशतिस्त्रिकमपरं परंतत्रिकेचापि ॥ द्वादशपौंडुन्नमइतिसोमे सु ३८
वेदीमानमिह ॥१७॥ पंचदशसुप्रक्रमेष्वाणिनिरंछनार्थचिक्कं ॥ तत्र
कविंशतिप्रक्रमेषुआमामसानामतत्तत्रिषुनिरंछनायततत्त्रिधे

शो

सप्यतेद्वादशपाणयः ॥ एवंचतुःपंचाशत्प्रक्रमारजुरित्यर्थः ॥ प्राक्तत
वेदिमाह ॥ षडरत्निर्द्विपाणिश्चमध्येपंचसुचिन्हिता ॥१७॥ द्विहस्तेगुलष
ट्कंचत्रिषुहस्तेषुद्वादशकेषुच ॥ सार्द्धहस्तेद्विपाणिः स्याद्वेदिःस्यात्तोरणीयासि
की ॥१८॥ पंचसुस्थानेषुतान्याह द्विहस्तेश्रोणिया ॥ अंगुलषट्केश्रोणिनि
रंछनायततोद्वादशांगुलेष्वायामायाततस्तावत्यंसनिरंछनाम ॥ त
तःसार्द्धहस्तेपाणिअत्रनिरंछनभेदादंसाधिरज्जुविपर्ययोनेत्यर्थः
॥ मध्यमंग्रहविधिमाह ॥ आनीयरज्जुंपूर्वद्वीसप्तार्द्धंयावदेवतु
द्विगुणीकृत्यतांरज्जुंतत्रांकनिखानयेत् ॥१९॥ वेदीश्रोणेस्समांशे
छेनयारज्वाष्टभागया ॥ वापृथुत्वंतुरीयेणमध्येनाभिरयंहो २०

शं चतुरस्रिः पूर्वभागे अरत्निः प्राग्पर्यन्तावेदिरस्ति तत्र पूर्वार्द्धे पूर्व-
तिर्यङ्मानी नाड्ययः शंकुः प्राचीं कुर्यात्तस्मात्रज्जुमश्वाड्ययावदानीयप्र-
तीध्यं तिर्यङ्मानी मध्येयः शंकुः स्तस्मं तं दक्षिणां सदक्षिणां श्रोणिं शं
कुवेष्टयन्नानीयसात्वानीतारज्जुः सप्तपंचाशदधिकशतांगुलाभवंति
तांरज्जुं द्विगुणीकृत्यपूर्वार्द्धे शंकोर्दक्षिणांसवेष्टनपूर्वकंदध्यात्।।एव-
मुत्तरतोपि।।तत्रचदक्षिणोत्तरपार्श्वमात्मामध्येशंकुधोनिखनेत्।।तो
चशंकूअधस्तात्साईद्वाचत्वारिंगुलांतोश्रोणियारुपरिसार्द्धत्रिंशदंगुलां ३९
तेपततः।।तयासप्तपंचाशदधिकशतमंगुलमितयारज्जुअष्टभागयो-
अष्टमोभागस्याअष्टौवाभागस्यत्रयाष्टभागरूपयाकिंचिदधिकसार्द्ध

कोनविंशत्यंगुलरूपयामध्येनश्रोणिंसमध्यस्थंशंकुनालिखद्वौसंग्रहौ-
वेदैःसंक्षेपोकुर्यात्।।अयमर्थःगतरज्जोरष्टमभागमितयारज्वादिशंकु-
वारोप्यवेद्यंतदर्द्धंकुर्यादिवा।।मितस्तपक्षांतरमाह।।वाष्टधुत्वत्रुरीये
ण।।यद्वाष्टधुत्वस्यत्रुरीयेणचतुर्थांशेनसंग्रहेस्तः।।अयमर्थः।। श्रोणिं
समध्यनिखातशंकोर्यत्पृथुत्वंदक्षिणोत्तरंस्थापितसूत्रविस्तारः।।ष
डंगेनषडशीत्यंगुलमितस्तस्यत्रुरीयांशेकिंचिदूनसार्द्धैकविंश-
त्यंगुलात्मकः।।तेनशंकोःस्थापितेनदेयंतर्द्धमासार्द्धमासार्द्धेऽभ्य
त्रकुर्यादितियोएमासिकावेदमान।।अन्यासुदिक्षुमध्येसंग्रहोना-
स्तिप्रमाणंतरोपदेशात्।।पशुवेदिमाह।।नवारत्निमितारज्जुलक्षितांष

ष्टस्वतःपरैः॥अर्द्धेऽर्द्धेषुपात्राःस्यात्सुवेदिप्रसाधिनी॥२१॥चतुरस्त्रश्रो
णिस्त्रिरत्नंसाषड्रत्निप्राचीरूपानिरूढपशुबंधवेदी॥तत्रषट्रत्निक्षा
यामायतनोर्ध्वरित्नोनिरंछनाय॥ततोद्वेश्रोण्ये॥ततोर्धमाय॥ततस्त्रिष
ट्रेषुपात्रायेति॥त्रात्रावितमोमानमाह॥विंशत्यानुकरैःत्रात्रादत्रा
यमेनविस्तावितंतेचतुरस्रंस्यादूर्ध्वरित्नप्रमाणत॥विंशतिसहस्राय
तादत्रादस्तविस्तारात्रात्रा॥उत्तायतात्॥प्रागवत्रासोम्ये॥सत्रेषुदग्वंत्रादत्राह
स्तसमचतुरस्रंतुविमितं॥सदसोमाह॥ननेत्रानवकेवेलक्षणंकुर्यात्त्रीणि ५०
कुर्यात्त्रिषुत्रिषु॥उत्तमोनवकःपात्राःसदसोमानमुच्यते॥३॥तवारत्नि
षुश्रोण्यंयंततस्त्रिषुश्रोणिनिरंछनाम॥पुनस्त्रिषंसदिरंछनाम॥तत्

स्त्रिषंसायतनोनवमुपासएवेतिसदसोमानं॥सोत्रामणीवेदिमाह॥पदस्या
क्ष्णानिरश्वीचतमोरक्षणायानवेत्॥सोत्रामण्यांमितमावेदिःस्यात्सोम
वन्नया॥२४॥पदस्याक्ष्णायेतिअस्मार्थः॥पदमात्रणवचतुरस्रस्याक्ष्णयापार्
श्वमानीकार्यापदंतिर्यङ्मान्येवतिर्यङ्मानीःतयोरक्षमापदन्नमंक्षेपिक
रज्जुः सोत्रामण्यांप्रक्रमः॥द्वादशांगुलायसंदसमचतुरस्रस्याक्ष्णया
सापार्श्वमानीतस्यैवयातिर्यङ्मानीसात्वत्रापितिर्यङ्मानीतादृशास्दी
र्घचतुरस्रस्याक्ष्णयारज्जुःससोत्रामण्यांप्रक्रमार्थंतत्परिमितेनका
ष्ठेनसोमवेदिंकुर्यात्॥अयमर्थःतेनपूर्वोक्तेनप्रक्रमेणषड्रित्नात्म
कमाचतुर्विंशतिप्रक्रमापूर्वभागे॥त्रिंशात्मकमाषश्चात्॥एवंसोमव

त्तरावेदिभवति॥मध्यंत्यग्रंगच्छतामपिदमेवमार्थतत्समानं॥ ॥क्रमेन
विधिनायस्तुवेदिंकुर्यात्तुमानवः॥यजमानंतथात्मानंभूमौतारयतेध्रुवं॥
२५॥अतात्वासुल्बसङ्ख्यंवक्ष्यतेसौत्रामणीश्रुतेः॥वेदियेकर्तुमिच्छंतिशि
ल्पिनोदंतिनेनखैः॥२६॥प्रमाणंचप्रमेयंचयद्वाक्षैर्मस्तकंमितं॥सर्वंतत्प्र
स्तरेणोक्तंयद्वासिध्यंतिमात्रिकाः॥२७॥यथानक्षीयतेमानंयथाचनविवर्ध
ते॥यथाचरमतेदृष्टिस्तथायोगंसमाचरेत्॥२८॥अंगुल्यादिमानमाह॥
तंतुःपुष्करनालस्यषड्यवःपरिवेष्टितः॥वस्तयस्त्रिहायणीबालेनसदृशो[illegible]राया
नक्षेत्॥२९॥त्रयस्त्रिहायणीबालाःसर्षपाहींविधायते॥द्विगुणंसर्षपंवि
द्याद्यवंपंचैवसर्षपाः॥३०॥अंगुलस्यप्रमाणेतुषड्यवाःपार्श्वसंमिताः॥च

MEMORIAL

चतुर्विंशांगुलोरत्निर्वितस्तिर्द्वादशांगुलः॥३१॥ग्रामस्यचप्रमाणंतुचतुर्भू
नस्यतांगुल॥पुरुषस्यप्रमाणंतुत्रि[illegible]स्रक्षताधिका॥३२॥प्रपदोत्तूत्तर्ध्वं
बाहुःपुरुषौषः।तत्रंचमोंशोरत्निःअत्रस्त्रेअरत्निस्तोपहर्यात्रैअरं
त्निचतुर्विंशोंशोंगुलं॥अरत्निर्वितस्तिः।अंगुष्ठपर्वोंशोंत्यंकोदरं॥तत्रंच
मोंशोंसर्षपः॥सर्षपाष्टतीयोंस्त्रिहायणीबालः॥तत्रष्टोंशःपुष्करनंतुरि
त्यर्थः॥ ॥कृसतेपाकशोभार्थंद्वात्रिंशद्भागमिष्टका॥तस्माद्दप्रमाणंकां
र्यमानाधिकंबुधैः॥३३॥अथंरुमसःपादभागविषयः॥पृथ्यादिषुचतुर्द्विगुण
चतुर्गुणादिर्घायामयोर्ज्ञेयं॥खरलक्षणमाह॥ ॥अग्नीनांतुखरःकार्यमि
ष्वत्रत्रयसंज्ञितः॥द्वादशांगुलउल्लूखेविस्तारेचतुरंगुलः॥३४॥उक्तख

मानाङ्गहिर्मेखलात्रयचतुरंगुलमुपर्युपरि निवेश्यं यथात्रितयं मिलित्वा घ
दशांगुलमुच्छ्रयस्यात्तत्र रात्रिश्वरस्त्रपूर्वस्याग्नेःखरोनवेत्॥स्थचक्राकृतिःप
श्चाच्छ्रार्द्धइवदक्षिणः॥३५॥दक्षिणाग्नेःखरसाधनोपायमाह॥॥अग्नेरुदङ्मा
त्रमङ्गुलेमध्यंततोलिखेत्॥वृत्तंमेकोनविंशात्यादक्षिणार्द्धखरोस्मृतः॥
३६॥चतुरस्रंनुपावङ्घ्रिःप्रमाणैःकल्पितैस्तथा॥एकोनद्विगुणैस्तैस्तुरज्जुरेकाधि
कैर्मता॥३७॥अस्तांकृतेनुतस्मायामत्यक्षेपिकानवेत्॥सेवेषुःकरणीप्रोक्ता॥
सुल्वकारेणचोदिता॥३८॥मत्स्यसंक्षेपिकारज्जुरिषुर्नाम॥सचतावत्करणीमर्यं
॥॥वपनेनुक्तविधिनाकुर्यान्निर्माणमात्मनः॥तुर्यांशेनात्मनःपक्षौपुच्छंचर
यतेन्नतः॥३९॥अधिमानंपंचमांशंपक्षयो-र्न्यूनंन्यसेत्॥दशमोनेनपुच्छं

स्यउच्छ्रयणत्रयंवदयेत्॥४०॥पुच्छस्यपक्षयोश्चापिपक्षाद्देवनियोजयेत्॥दशमां
शपंचमांशलक्षणंत्वधिमानकं॥४१॥षड्विंशात्मकमाःप्राच्यांचतुर्विंशतिरंसयोः
श्रोण्यांत्रिंशात्मकमासुर्वदीसीमादिकेमरेव॥४२॥सूत्रदोषदरिद्रस्यगूढसं
त्रमनीयतः॥समाप्तेयंक्रियाशैल्बीकात्यायनमहात्मनः॥४३॥ ॥इतिशै
ल्वविवरणेमहीधरविनिर्मितेवेदीष्टकाष्टकावर्द्धनारव्याषष्ठीयंकंडीकाग
मात्॥ ॥रसवेदांध्रवर्षमास्यंत्यधवत्तेदृशे॥त्रयोदश्यांरविवारेवाणारस्या
महीधरः॥१॥श्रीरत्नेश्वरमिश्रस्यगुरोर्केशवजन्मनः॥आज्ञयाविवृतीशाल्बी
भाष्यवृत्त्यनुसारिणी॥२॥विदुषांसुखबोधायमधाक्षुध्यनुसारतः॥भाष्यं
मकृतंवृद्धिंस्त्रायतांलोच्यतत्तत॥३॥नीलकंठोरमानाथःसिताम्बरश्वरश्रव

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

२०॥ मेरवेशः कृपासिंधुः ---ष्यान्नृकेसरी ॥४॥ ॥इतिश्रीमन्महीधरविरचितेश्री
त्वत्रविवरणंसमाप्तं॥ ॥शुभंभवतु॥ ॥यादृशंपुस्तकं॥ ॥तादृशंलिखितं॥ ॥